हरितालिका तथा ऋषिपञ्चमी पूजाविधि

(व्रतकथासहित)

(नेपालीमा विधिनिर्देश र भावार्थसमावेश गरिएको)

सङ्कलन/सम्पादन

दिननाथ पण्डित

हरितालिका तथा ऋषिपञ्चमी पूजाविधि

(व्रतकथासहित)

(नेपालीमा विधिनिर्देश र भावार्थसमावेश गरिएको)

संकलन/सम्पादन
दिननाथ पण्डित

प्रकाशक
बगलामुखी धार्मिक प्रकाशन
काठमाण्डौं, नेपाल

पुस्तकको नाम : **हरितालिका तथा ऋषिपञ्चमी पूजाविधि (व्रतकथासहित)**
(नेपालीमा विधिनिर्देश र भावार्थसमेत समावेश गरिएको)

संकलन/सम्पादन : दिननाथ पण्डित
सर्वाधिकार : संकलकमा
संस्करण : २०७१/०३[illegible]
मूल्य रु : ६०/-

प्रकाशक : **बगलामुखी धार्मिक प्रकाशन**
काठमाण्डौं, नेपाल

मुद्रण :

विषयसूची

हरितालिका पूजाविधि प्रारम्भ	१
कर्मपात्रनिर्माणविधिः	१
प्रायश्चित्तगोदान	७
गोदानसंकल्प	८
दानप्रतिष्ठा	९
प्रतिज्ञासंकल्प	११
ब्राह्मणवरणः	११
दीपपूजनम्	१२
कलशपूजनम्	१३
गणेशपूजनम्	१७
उमामहेश्वर पूजा प्रारम्भ	२९
अङ्ग पूजा	३३
आवरण पूजन	३६
मन्त्रपुष्पाञ्जली	३७
वायनम्	४०
हरितालिका व्रतकथा प्रारम्भः	४४
ऋषिपञ्चमी पूजाविधि प्रारम्भः	५५
कर्मपात्रनिर्माणविधिः	५६
प्रायश्चित्तगोदान	५८
गोदानसंकल्प	५९
दानप्रतिष्ठा	६०
ब्राह्मणवरणम्	६२
दीपपूजनम्	६३
कलशपूजनम्	६४
गणेश पूजनम्	६८
ऋषिहरुको पूजाविधि प्रारम्भ	७९
ऋषिपञ्चमी व्रतकथा प्रारम्भः	९४
हरितालिका पूजासामग्री	१०८
ऋषिपञ्चमीको पूजासामग्री	१०८
पौराणिक शब्दावली	१०८

हरितालिका पूजाविधि प्रारम्भः

भाद्रशुक्ल पक्ष तृतीया तिथिलाई हरितालिका तीज भनिन्छ। यसदिन महिलाहरुले हरितालिका तीजको व्रत बस्ने गर्दछन् । भाद्रशुक्लपक्ष तृतीया तिथिका दिन व्रत गर्ने महिलाले बिहान उठेर तिलको पिना र अमलाको धूलोले स्नान गरी नित्यकर्म सकेर चोखो वस्त्र धारण गरी पूजा गर्ने स्थानमा बसी पहिले आचमन गर्ने र कर्मपात्र बनाउने :

यस मन्त्रले आचमन गर्ने–

ॐ अच्युताय नमः स्वाहा। ॐ केशवाय नमः स्वाहा।
ॐ माधवाय नमः स्वाहा।

यस मन्त्रले हात धुने **ॐ गोविन्दाय नम स्वाहा ।**

कर्मपात्रनिर्माणविधिः

कर्ताले पञ्चगव्य प्राशन गरेपछि आसनमा बसी तीनपटक आचमन गरेपछि ***ॐ आधारशक्तये नमः*** *भनी आफ्नो अघिल्तिर दाहिनेपट्टि भुइँमा अलिकति फूलअक्षताहरु चढाएर त्यसमाथि तामाको एउटा चोखो भाँडो वा थाली राख्नुपर्छ । त्यसपछि तल लेखिएअनुसार मन्त्रहरु पढ्दै कर्मपात्र बनाउँदै जानुपर्छ।*

कर्मपात्र राख्ने ठाउँमा फूलअक्षता लिई छुने–
तीन कुशकण्डिकाले कर्मपात्रको स्थापना गर्नेः–

ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम्। अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वथं॰ हसः ॥१॥ ॐ यदि दिवा यदि नक्तमेनाथं॰ सि चकृमा वयम्। वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वथं॰ हसः ॥२॥ ॐ यदि जाग्रद्यदि स्वप्नऽ एनाथं॰ सि चकृमा वयम्। सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वथं॰ हसः ॥३॥ *भनी अक्षतापुञ्जमाथि कर्मपात्रको स्थापना गर्नुपर्छ।*

कर्मपात्रमा पवित्र र कुशका टुक्राहरू राख्ने मन्त्र–

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। *यो मन्त्र पढ्दै कर्मपात्रमा पवित्र राख्नुपर्छ।*

शुद्धजल राख्ने मन्त्र–

ॐ शं नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः॥

फूल राख्ने मन्त्र–

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वेनक्षत्राणि रुपमश्विनौ व्यात्तम्। इष्णन्निषाणामुं मऽइषाण सर्वलोकं मऽइषाण॥

जौराख्ने मन्त्र–

ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृँषदनाः पितृषदनमसि ॥

तिलराख्ने मन्त्र–

ॐ तिलोसिसोमदैवत्यो गोसवोदेवनिर्मितः।

प्रत्नमद्भिपृक्तः स्वधया पितृँल्लोकान्पृणाहिनः स्वाहा॥

चन्दन राख्ने मन्त्र–

ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्यङ्करीषिणीम्।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

अक्षता राख्ने मन्त्र–

ॐ अक्षन्नमीमदन्तह्यवप्रिया ऽअधूषत ॥

अस्तोषतस्वभा नवो विप्रा नविष्ठयामती योजान्न्विन्द्र ते हरी ॥

अभिमन्त्रण गर्ने–

ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥१॥ ॐ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् । वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥२॥ ॐ यदि जाग्रद्यदि स्वप्नऽ एनाꣳसि चकृमा वयम् । सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥३॥ *यी तीन मन्त्रले कर्मपात्रको जललाई विस्तारै चलाउदै अभिमन्त्रण गर्नुपर्छ।*

अब दाहिने हातको बूढी औंला र साहिली औंलाले चलाई कर्मपात्रमा रहेका तीनवटा कुशको टुक्रा लिई जलले आफूलाई र पूजनसामग्रीलाई सेचन गर्ने–

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनातु–३ ॐ पुण्डरीकाक्षाय नमः ३ । तीनपटक भन्ने ।

त्यसपछि कुशका तीनवटा टुक्राले आफूलाई सेचन (मार्जन) गर्ने।

कर्मपात्रमा भएको पवित्रलाई धारण गर्ने–[1]

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥

यस मन्त्रले सरस्यूँलाई चारैतिर छर्कनुः

---

1 ***कुशको पवित्रधारणसम्बन्धी जानकारी–*** *कुशको पवित्रीलाई देवकार्य र ऋषिकार्य गर्दा दायाँ हातको अनामिका (काँहिली) औंलामा लगाउने र पितृकार्य गर्दा चोर औंला (तर्जनी) मा लगाउनु पर्ने शास्त्रीय मान्यता छ।*

ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः।
ये भूता विध्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥१॥
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रत्यं तत्र गच्छतु॥२॥

प्रायश्चित्तगोदान♥

कर्मपात्रको निर्माण गरिसकेपछि प्रायश्चित्त गोदान गर्नुपर्छ।

यजमानले– गाई भए गाईदान वा गाई नभए गाईको मूल्यसम्झेर गाईको मूल्य बराबरको पैसा (निष्क्रय), गोबर चाँदी एवं तामाका रूपियाँ पैसा टपरी/बोहोतामा राखी फूल अक्षताले पूजा गर्ने

ब्राह्मणले– तलका मन्त्रहरु पढ्दै जाने–

कर्ताले —गाईको पूजा गर्ने–

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मासुताभ्यश्च पवित्राभ्यो नमो नमः। ॐ इरावती धेनुमतीहि भूतॣ सुयवसिनीमनवेदशस्या। व्यस्क्कभ्ना रोदसी व्विष्णवेतेदाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा॥ ॐ गवे नमः गौरुपद्रव्येभ्यो नमः *गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि॥*

अब यसमानले ब्राह्मणलाई टीका लगाइदिने–

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च। जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥ ॐ ब्राह्मणाय नमः।

कुशका तीनवटा टुक्रा लिएर तलको मन्त्रले तर्पण गर्ने–

माथि गोदानमा छुट्याइएको दुना/टपरीको पैसा कुशको टुक्राले त्यहींको जलले आफूलाई सेचन गर्नेः

♥ *कुनै पनि कर्म गर्दा कर्म गरिने कर्ता लगायत कर्ताका परिवारलाई समेत प्रायश्चित्तगोदान गर्न लगाएर उसको देह शुद्ध पार्नु अति आवश्यक हुन्छ। तसर्थ सजिलो होस् भन्नको लागि यहा प्रायश्चित्त गोदानको कर्म संक्षिप्तमा राखिएको छ।*

ॐ मनोमेतर्पयत, वाचम्मेतर्पयत, प्राणम्मेतर्पयत, चक्षुर्मेतर्पयत, श्रोत्रम्मेतर्पयतात्मानंमेतर्पयत, प्रजां मे तर्पयत, पशून्मे तर्पयेत, गणान्मे तर्पयत ॐ गणा मे मा वितृषन् ॥

यजमानले- कुशका टुक्रा लिएर तलको मन्त्रले मार्जन गर्ने।

ॐ आपो हिष्ठामयोभुवः । ॐ स्तानऽउर्जे दधातन ॥ ॐ महेरणाय चक्षसे। ॐ यो वः शिवतमो रसः ॥ ॐ तस्य भाजयतेह नः। ॐ उशतीरिव मातरः ॥ ॐ तस्माऽअरं गमाम वो यस्य क्षयाय जिन्वथ। ॐ आपो जनयथा च नः ॥

गोदानसंकल्प

कर्ताले- जलसहित कुशका तीनटुक्रा, जौ, तिल र जललिएर दुना वा बोहोतालाई छोइराख्ने र ब्राह्मणले गोदान संकल्प भन्ने-

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येह श्रीमद्भगवतो महापुराणपुरुषस्य विण्णोराज्ञया प्रवर्तमानस्य सकलजगतः सृष्टिकारिणो ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे प्रह्लादाधिपत्ये मनौ सप्तमे वैवस्वतमन्वन्तरे सत्यत्रेताद्वापरान्ते बौद्धावतारे अष्ट्यविंशतितमे कलियुगे तस्य प्रथमचरणे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्ते गङ्गादेव्या उत्तरदिग्भागे हिमाचलस्य दक्षिणपार्श्वे नेपालदेशे पाशुपतक्षेत्रे पशुपतेः गुह्यकाल्याश्च (अमुक) दिग्भागे (अमुक) नगरे, ग्रामे वा इह पुण्य भूमौ षष्टिसंवत्सराणां मध्ये (अमुक) नाम्निसंवत्सरे श्रीसूर्य (अमुकायने) (अमुक) ऋतौ मासे (अमुक) पक्ष (अमुक) तिथौ (अमुक) वासरे (अमुक) राशिस्थिते श्रीसूर्य (अमुक) राशिस्थिते देवगुरौ (अमुक) राशिस्थिते चन्द्रमसि अन्येषु शेषुग्रहेषु यथायथा राशिस्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्यान्वितायां शुभपुण्य तिथौ (अमुक) गोत्रः

(अमुक) प्रवरः सपत्नीकः पुत्रादिपरिवार सहितः (अमुक) शर्माहं (नामाहं) सकलपापक्षयपूर्वकं नूतन गृहस्य निर्विघ्नं स्थिरत्वावाप्तिपूर्वकं दीर्घमायुरोग्यैश्वर्यादिविबृद्धये पार्वती सहित श्रीसाम्बसदाशिवपूजां कर्म च इमां प्रायश्चित्तीभूतां गां रुद्रदैवताकां द्रव्यं वनस्पति दैवतं अमुकगोत्राय सुपूजिताय ब्राह्मणाय प्रायश्चित्त गोदानत्वेन कर्म च करिष्ये।

कर्ताले - ब्राह्मणलाई कुशको टुक्रा हातमा राखि दिने र ब्राह्मणले - **ॐ स्वस्ति** *भनी कुश लिने।*

गाईको प्रार्थना– *(यजमानले– फूलअक्षता लिएर गाईको प्रार्थना गर्ने)–*

ब्राह्मणले– तलको मन्त्र भन्ने–

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि। सर्वदेवमयी यस्मात् तस्मात् शान्तिं प्रयच्छ मे॥ ॐ गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्॥ *यसपछि यजमानलाई जलले सेचन गरिदिनुपर्छ।*

दानप्रतिष्ठा

जलकुशको टुक्रा लिएर प्रतिज्ञा संकल्प गर्ने– अब आफूले अर्पण गरेको पैसालाई भूइँमा राखी फूलअक्षताले पूजा गर्नेः–

ॐ स्वर्णधर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वाहा स्वर्णसूर्यः स्वाहा॥ *भनी पूजा गर्ने।*

त्यसपछि कुशको टुक्रा लिएर संकल्प गरिएको पैसालाई हातमा लिने

ॐ अद्यकृतैतत् गोदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं इमां दक्षिणां यथा नामगोत्राय शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ *भनि ब्राह्मणलाई दिने।*

अब ब्राह्मणले **ॐ स्वस्ति इति प्रतिवचनम्** *भनी गोदान प्रतिष्ठा लिनु।*

गाईको प्रदक्षिणा *(जलले प्रदक्षिणा गर्दै मन्त्र भन्ने)-*

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदेपदे ॥

अब गोदानलाई अलि परसारेर नमस्कार गर्ने[2] *-*

ॐ नमस्ते कपिले देवि संसारार्णवतारिणि।
द्विजेन्द्राय ददामि त्वा प्रसन्नो भव सर्वदा।

ब्राह्मणले- कर्तालाई टपरीमा राखेको गोबर जलबाट तीनटुक्रा कुशलिई जलले अभिषेक गरिदिने-

ॐ कोदात्कस्माऽअदात्कामोदात्कामायादात्।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते।

अभिषेक स्वास्तिवाचन- ब्राह्मणले तलको मन्त्रले स्वस्तिवाचन गर्ने-

ॐ द्यौः शान्तिरन्तरिक्ष७ँ शान्तिः पृथिविशान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व७ँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ यतो यतः समीहसे ततो नोऽभयं कुरु। शं नः कुरु प्रजाभ्यो भयन्नः पशुभ्यः ॥ सुशान्तिर्भवतु ॥ ॐ सर्वारिष्टशान्तिरस्तु। उत्तरोत्तरवृद्धिरस्तु। *भनेपछि नमस्कार गरी फूल अक्षता यज्ञको सबैतिर छर्की दिने।*

प्रतिज्ञासंकल्प- *कर्ताले हातमा जौ, तिल पनि लिने :*

हरिः ॐ तत्सत् ३ः ॐ विष्णुः ३ इत्यादि पूर्वसंकल्पसिद्धिरस्तु अद्येय देशकालौ स्मृत्वा अमुक गोत्रः,

---

[2] *गोदान प्रतिष्ठालाई उचाल्न हुँदैन, अधिकांश (यजमान) कर्ताले अन्जानमा उचाल्ने गर्दछन्।*

अमुक शर्मा अहं मम इह हरितालिकाव्रत कर्मणि दीप कलश गणेश पूजनपूर्वकं स्थैर्यसिद्धये आयुरारोग्य पुत्रपौत्राद्विपद चतुष्पदधन धान्यादिसमृद्धये शिवप्राप्तये च नन्दादि पञ्चदेवताः स्थापन पूजनपूर्वक श्रीसाम्बसदाशिवपूजनं कर्म अहं करिष्ये ।

भनि कुश छोडी दिने।

ब्राह्मणवरणः

ब्राह्मणवरण गर्नका लागि कर्मपात्रको जौ, तिल, कुश, जल, चन्दन, दूवो, अक्षता, पान, सुपारी, वस्त्र, द्रव्य पात्रमा राखी पूर्व फर्केर संकल्प गरी वरण गर्ने, वरण गर्दा सर्वप्रथम पुण्याहवाचन गरिदिनुहोस् भनी ब्राह्मणलाई आग्रह गर्ने।

सङ्कल्प–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ इत्यादिदेशकालादीन् सङ्कीर्त्य (अमुक) गोत्रः (अमुक) प्रवरः (अमुक) शर्माहं मम (अमुक) कर्मणि कृताकृतावेक्षणादिरुपब्रह्मकर्मकर्तुं तथा च (अमुक) कर्मणि प्रतिदेवतानां मुखे साज्यभागान्तमाहवनीयद्रव्य युतहोमकर्मकर्तुं तथा च (अमुक) कर्मणि तत्तत्कर्मविहितोप योग्याचारकर्मकर्तुं तथा च (अमुक) कर्मणि चतुर्वेदोक्तमन्त्र जपपाठकर्मकर्तुं अमुकनामगोत्रान् अमुकनामशर्मणो ब्राह्मणानेभिश्च चन्दनपुष्पाक्षत ताम्बूलपूगीफलवासोद्रव्य सोद्रव्याभरणादि भिर्गणपतिब्रह्मा होत्राचार्यत्वेन जापकपाठकत्वेन ऋत्विक्त्वेन च युष्मानहं वृणे । ॐ वृताः स्म *इति ब्राह्मणाः ब्रूयूः* **। यथा विहित कर्म कुरुत । करवामः ।**

त्यसपछि ब्राह्मणहरूले:- **ॐ वृताः स्म** *(वरण गरियौं) भन्ने।*

ब्रह्माप्रार्थनाः (फूलअक्षता लिएर ब्रह्माको प्रार्थना गर्ने)

ॐ यथा चतुर्मुखो ब्रह्मा सर्ववेदाविशारदः । तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥

आचार्य प्रार्थना : (आचार्यको प्रार्थना गर्ने)-

ॐ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ।
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥

यजमानले- **ॐ यथाविहितं कर्म कुरुत-** *(जे गर्नुपर्ने कर्म हो गर्नुहोस्)*
ब्राह्मणले- **ॐ यथाज्ञानं करवामः** *(आफूले जानेअनुसारको हवस गर्छौं) भन्नु ।*

दीपपूजनम् :

तलको मन्त्रले दीयो बाल्ने-

ॐ स्थिरोभव व्वीड्वङ्गऽआशुर्ब्भव व्वाज्न्यव्वन् । पृथुर्ब्भव सुषदस्त्वमग्नेः पुरीषाबाहणः ॥

दीपको पूजा गर्ने मन्त्र- (चन्दन अक्षता फूलपातीले दियोको पूजा गर्ने)

ॐ पृष्ठो दिवि पृष्ठो अग्निः पृथिव्यां पृष्ठो विश्वा ओषधीरा विवेश वैश्वानरः सहसा पृष्ठो अग्निः स नो दिवा स रिषस्पातु नक्तम् ॥ भनी पूजा गर्ने । कर्मसाक्षिणे दीप नारायणाय नमः *भनी शुद्धजल, अर्घ, चन्दन, पञ्चामृत, वस्त्र, सिन्दूर, तिल, जौ, धूप, फूलअक्षता समर्पयामि ॐ दीपनारायणाय नमः* ***भनी चढाउने।***

कर्ताले फूलअक्षता लिएर दीयोको प्रार्थना गर्ने –

सुप्रकाशो महादीप्तः सर्वतस्तिमिरापहः ।
स बाह्यभ्यन्तरज्योतिर्दीपोऽयं प्रतिगृह्यताम् ।
ॐ नमः कमलनाभाय नमस्ते जलशायिने ।

नमस्ते केशवानन्त वासुदेव नमोऽस्तुते ॥
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तुते ॥
ॐ शुभं भवतु कल्याणं आरोग्यसुखसम्पदम् ।
सर्वशत्रुविनाशाय दीपज्योतिर्नमोऽस्तु ते ॥

कलशपूजनम् :

अब कलशको स्थापना र पूजागर्ने विधि

भूमिशोधनम्– (हातमा फूल अक्षता लिएर तलको मन्त्र पढी भूमि छुने)

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥

धानराख्ने मन्त्र– (सप्तधान्य वा धानचामल राख्नु)

ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥

कलश राख्ने मन्त्र– (धान चामल माथि कलश राख्नु)

ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः । पुनरुर्जा निवर्तस्व सानः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ।

तीर्थजल/गंगाजल राख्ने– (यसमन्त्रले कलशमा जल भर्ने कार्य गर्नु)

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥

सर्वौषधी राख्ने– (यसमन्त्रले सर्वौषधी राख्नु)

ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनैनु बभ्रूणामहꣳशतं धामानि सप्त च॥

तलको मन्त्रले पञ्चरत्न राख्ने–

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्। स दाधार पृथिवीं द्यामुते माङ्कसमै देवाय हविषा विधेम॥

तलको मन्त्रले फल चढाउने मन्त्र– (फल वा सिंगो सुपारी राख्ने)

ॐ याः फलानीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसुतास्तनो मुञ्चन्त्व ꣳ हसः।

तलको मन्त्रले जौ राख्ने–

ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीर्दिवेत्वान्तरिक्षाय त्वा पृथिब्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि॥

तलको मन्त्रले गन्ध (श्रीखण्ड चन्दन) राख्ने–

ॐ गन्धद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥

तलको मन्त्रले दूवोराख्ने–

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च। (शु.य.१३।२०)

सप्तमृत्तिका (सातठाउँको माटो) राख्ने –

ॐ स्योना पृथिवी नो भवा नृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः। (शु.य. ३६।१३)

पञ्चपल्लव[*] राख्ने मन्त्र–

ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।

गोभाजऽइत्किलासथयत्सनवथ पूरुषम्॥ (शु.य.१२।७९)

वस्त्र (कपडा) चढाएर बेरि दिने–

ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभातिक्रतु मज्जनेषु। यद्दीदयच्छ वसऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥ उपयामगृहीऽतोसि बृहस्पतयेत्वैषते योनिर्बृहस्पतये त्वा॥ (शु.य.२३।३६)

यसमन्त्रले कलशको मुखमा आँप चाँप पिपलको पात राख्ने–

ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन।

ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्।

कलशमा वरुण देवताको आवाहन गरी पूजा गर्ने–

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेहवोद्धयुरुश ँ समानऽआयुः प्रमोषी॥ (शु.य.१८।४९)

ॐ साङ्गसपाशसपरिवार वरुण इह आगच्छ इह तिष्ठ मम पूजां गृहाण यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव॥ अहेडमानो वरुणेह बोद्धयुरुशꣳस समानऽआयुः प्रमोषी॥

वरुणको प्रार्थना गर्ने मन्त्र–

वरुण त्वं महाभाग सर्वदेवप्रपूजित।

---

[*] पञ्चपल्लवभित्र वर, पीपल, आँप, डुम्री र पाखुरीका पातहरू पर्दछन्।

वितते मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा ॥

गंगादि तीर्थहरूको आवाहन गर्ने -

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।

अभिमन्त्रण गर्ने :- (कलशको मुखदेखि पिंधसम्म छुनलगाएर भन्ने)

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूलेत्वस्य स्थितो ब्रह्मामध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सप्तसप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथयजुर्वेदः सामवेदोऽप्यथर्वणः ॥ अंगैश्चसहिता सर्वेकलशं तु समाश्रिताः ।

पञ्चोपचार वा षोडशोपचारले पूजा गर्ने-

इदम् आसनं, पाद्यम्, अर्घम्, आचमनीयम्, पञ्चामृत-स्नानम्, शुद्धोदकस्नानम्, वस्त्रम्, गन्धम्, अक्षतान्, सिन्दूरम्, यवतिलान, पुष्पं, माल्यं, धूपं, दीपं, नैवेद्यं, ताम्बूलम्, द्रब्याभरणादीनि च समर्पयामि, ॐ साङ्गायसपरिवाराय सायुधाय सवाहनाय स्वशक्तिसहिताय वरुणाय नमः ।

कलश प्रार्थना गर्ने-

ॐ देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । र्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ ॥ इति कलश प्राथर्ना ॥

गणेशपूजा-

अव गणेशको पूजा गर्ने हातमा जौ, तिल, कुश र कर्मपात्रको जल लिएर सङ्कल्प गर्ने–

हरि ॐ तत्सत् ३ ॐ विष्णु ३ पूर्वसङ्कल्पमुच्चयार्य, अमुक गोत्राय अमुक शर्माहं मम कर्मणः निर्विघ्नंपरिसमाप्त्यर्थं यथा संपादितोपचारै श्रीमन्महागणपतिपूजनमहं करिष्ये ॥

गणेशको आवाहन गर्ने– (फूलअक्षता लिएर आवाहन गर्ने)

ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधिनान्त्वा निधिपतिꣳ हवामहे वसोमम । आहमजानि गर्ब्भधमात्वमजासि गर्ब्भधम् ॥ ॐ हे हेरम्ब त्वमेह्येहि अम्बिका न्त्र्यंवकात्मज । सिद्धिबुद्धिपते न्त्र्यक्ष लक्षलाभयुतः शिव । नागस्य नागहार त्वं गणराज चतुर्भुज भूषित्त स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः । इहागत्य गृहाण त्वं पूजां कर्तुं च रक्षा माम् ॥ ॐ भुर्व्भूवः स्वः गणपतयेसिद्धिवुद्धि सहिताय सायुधाय सवाहनाय सपरिवारय इदमासनं श्रीमन्महागणाधिपते ! इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव ।

आसन दिने :-

ॐ विचित्ररत्नखचितं दिव्यास्तरणसंयुतम् ।
स्वर्णसिंहासनं चारु गृह्णीष्व सुरपूजित ॥
ॐ पुरुष एवेद ꣳ सर्व यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशनो यदन्नेनातिरोहति ॥ (शु. य. ३१।२)
आसनार्थे अक्षतान् समर्पयामि ।

पाद्यम्– यस मन्त्रले पाउ पूजागर्नें –

ॐ सर्वतीर्थसमुद्भूतं पाद्यं गन्धादिभिर्युतम् ।
विघ्नराज ! गृहाणेमं भगवन् ! भक्तवत्सल ! ॥
ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोऽस्य व्विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ (शु. य. ३१।३
पादयोः पाद्यं समर्पयामि ।

अर्घ्यम्– यस मन्त्रले अर्घ दिने–

ॐ गणाध्यक्ष ! नमस्तेऽस्तु गृहाण करुणाकर ! ।
अर्घ्यं च फलसंयुक्तं गन्धपुष्पाक्षतैर्युतम् ॥
ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत् पुनः ।
ततो विष्वं व्यक्रामत् साशनानशने अभि ॥ (शु. य. ३१।४)
हस्तयोरर्घ्यं समर्पयामि ।

आचमनीयम्– यस मन्त्रले आचमन गराउने–

ॐ विनायक ! नमस्तुभ्यं त्रिदशैरभिवन्दित ! ।
गङ्गोदकेन देवेश ! कुरुष्वाचमनं प्रभो ! ॥
ॐ ततो व्विराडजायत व्विराजोऽधि पूरुषः ।
स जातो अत्यरिच्यत प्रश्चद् भूमिमथो पुरः ॥ (शु. य. ३१।५)
आचमनीयं समर्पयामि

स्नानम्– यस मन्त्रले स्नान गराउने–

ॐ मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ॥
ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे व्वायव्यानारण्या ग्राम्याश्च ये ॥ (शु. य. ३१।६)
स्नानार्थं जलं समर्पयामि ।

पञ्चामृतस्नानम्— यस मन्त्रले पञ्चामृतले स्नान गराउने

ॐ पञ्चामृतं मया नीतं पयो दधि घृतं मधु ।
शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥
ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधासो देशे भवत्सरित् ॥

गोपयसा— यस मन्त्रले गाईको दूध चढाउने

ॐ कामधेनुसमुद्भूतं सर्वेषं जीवनं परम् ।
एज्ञहेतुः पावनं च पयः स्नानार्थमर्पितम् ॥
ॐ पयःपृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ (शु. य. १८।१६)
पयःस्नानं समर्पयामि ।

दधिस्नानम्—यस मन्त्रले दहिले स्नान गराउने

ॐ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देव ! स्नानार्थं प्रतिगृह्यताम् ॥
ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
मुरभिनो मुखाकरत्प्रण आयूꣳषि तारिषत् ॥ (शु. य. २३।३२)
दधिस्नानं समर्पयामि ।

गोधृतस्नानम्— यस मन्त्रले गाईको घिउले स्नान गराउने

ॐ नवनीतसमुद्भूतं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रयच्छामि स्नानार्थं प्रतिगृह्यताम् ॥
ॐ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतमस्य धाम ।
अनुष्वधमावह मादयस्व स्वाकाकृतं वृषभ वक्षि हव्यम् ॥

अथवा— (शु. य. १७।८८)

ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि ।

प्रियो देवानामनाधृष्टं देवयजनमसि ॥
घृतस्नानं समर्पयामि ।

मधुस्नानम्– यस मन्त्रले मन्त्रले महले स्नान गराउने

ॐ पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थ प्रतिगृह्यताम् ॥
मधुस्नानं समर्पयामि ।

शर्करास्नानम्– यस मन्त्रले शखरले स्नान गराउने

ॐ इक्षुसारसमुद्भूतां शर्करा पुष्टिदां शुभाम् ।
मलापहारिका दिव्यां स्नानार्थ प्रतिगृह्यताम् ॥
ॐ अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम् ।
अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तमगृहीतोऽसीन्द्राय त्वाजुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥
शर्करास्नानं समर्पयामि ।

शुद्धोदकस्नानम्– यस मन्त्रले शुद्धजलले स्नान गराउने

ॐ गङ्गा च यमुना चैव गोदावरी सरस्वती ।
नर्मदा सिन्धु कावेरी स्नानार्थ प्रतिगृह्यताम् ॥
ॐ आपो हिष्ठा मयो भुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ।यो वःशिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा चन ॥ शुद्धोदकस्नानं समर्पयामि ।

स्नानाङ्गमाचमनीयम्– यस मन्त्रले विभिन्न अंगमा स्नान गराउने

ॐ सर्वतीर्थसमायुक्तं सुगन्धिनिर्मलं जलम् ।
आचम्यतां मया दत्तं गृहाण परमेश्वर ॥
ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।

शंय्योरभिस्रवन्तु नः ॥ (शु. य. ३६।१२)
स्नानाङ्गचमनीयं समर्पयामि ।

वस्त्रम्– यस मन्त्रले कपडा चढाउने

ॐ शीतवातोष्णसन्त्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ॥
ॐ युवा सुवासा परिवीत आगात्सउश्रेयान्भवतिजायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ।
वस्त्रं समर्पयामि ।

ततः ॐ भूर्भुवः स्वः श्रीगणेशाय नमः वस्त्राङ्गमाचमनीयं समर्पयामि ।

उपवस्त्रम्– यस मन्त्रले वस्त्र चढाउने

ॐ सूक्ष्मतन्तुमयं दिव्यं वपुः शोभाकरं महत् ।
उपवस्त्रं मया दत्तं गृहाण गणनायक ॥
ॐ सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः ।
वासो अग्ने विश्वरूपह्य संव्ययस्व विभावसोः ॥ (शु. य. ११।४०)
उपवस्त्रं समर्पयामि ।

उपवीतम्– यस मन्त्रले जनै चढाउने

ॐ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ।
उपवीतं मया दत्तं गृहाण गणनायक ॥

यस मन्त्रले जनै चढाउनेः-

ॐ तस्मादश्वा अजायन्त ये के चोभयादतः ।
गवो ह यज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ (शु. य. ३१।८)
यज्ञोपवीतं सपर्मयामि ।

चन्दनम्– यस मन्त्रले चन्दन चढाउने

ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥
ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां वृहस्पतिः।
त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत॥ (शु. य. १२।९८)
चन्दनं समर्पयामि।

कुङ्कुमम्– यस मन्त्रले सुगन्धित द्रव्य चढाउने

ॐ कुङ्कुमं कामदं नित्यं कामिनीकामसम्भवम्।
कुङ्कुमेनाचंनं देव गृहाण परमेश्वर॥

नानापरिमलद्रव्याणि– यस मन्त्रले विभिन्न किसिमका द्रव्यहरु चढाउने

ॐ नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम्।
अबीरनामकं दिव्यं गन्धं चारु प्रगृह्यताम्॥
ॐ अहिरिब भोगैःपर्येति बाहुञ्ज्याया हेतिम्परिबाधमानः।
हस्तध्नो व्विश्व व्वयुनानि विद्वान् पुमान्पुमाँ॑सम्परिपातु विश्वतः।
कुङ्कुमं नानापरिमलद्रव्याणि समर्पयामि।

अक्षतान्– यस मन्त्रले अक्षता चढाउने

ॐ अक्षताश्च सुरश्रेष्ठाः कुङ्कुमाक्ताः सुशोभनाः।
मया निवेदिता भक्त्या गृहाण परमेश्वर॥
ॐ अक्षन्नमीमदन्त ह्याव प्रिया अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी॥
अक्षतान् समर्पयामि।

पुष्पाणि– यस मन्त्रले फूलहरु चढाउने

ॐ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो।
मयाऽऽहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥
सुगन्धिपुक्ष्पर्निचयैर्ग्रथितां पुष्पमालिकाम्।
ददामि तव शोभार्थं गृहाण परमेश्वर॥
ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः।
ऋश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः॥ (शु. य. १२।७७)
पुष्पाणि (पुष्पमालां च) समर्पयामि।

दूर्वाङ्कुरान्– यस मन्त्रले दूवो चढाउने

ॐ त्वं दूर्वेऽमृतजन्मानि वन्दितासि सुरैरपि।
सौभाग्यं सन्तर्ति देहि सर्वकार्यकरी भव॥
दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान्।
आनीतांस्तव पूजार्थं गृहणा गणनायक॥
ॐ काण्डात्काण्डात् प्ररोहन्ती परुषः परुषस्परि।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च॥ (शु. य. १३।२०)
ॐ श्रीगणेशाय नमः दूर्वाङ्कुरान् समर्पयामि।

धूपम्– यस मन्त्रले धूपबत्ति दर्शाउने

ॐ वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥
ॐ धूरसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः। देवानामसि बह्नितमꣳ सस्नितमं जुष्टतमं देवहूतमम्॥ ॐ श्रीगणेशाय नमः धूपमाघ्रापयामि।

दीपम्– यस मन्त्रले दीप जलाउने

ॐ साज्यं च वह्निसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥

भक्त्या दीपं प्रयच्छामि देवाय परमात्मने ।
त्राहि मां निरयाद् घोराद्दीपज्योतिर्नमोऽस्तु ते ॥
ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा । अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वचः स्वाहा । ज्यातिः सूर्यः सूर्यो ज्यातिः स्वाहा ॥
ॐ श्रीगणेशाय नमः दीपं दर्शयामि ।

नैवेद्यम् – यस मन्त्रले नैवेद्य चढाउने

ॐ नैवेद्यं गृह्यातां देव भक्ति मे ह्यचलां कुरु ।
ईप्सितं च वरं देहि परत्र च परां गतिम् ॥
शर्कराघृतसम्पवं सुस्वादु मधुरं हितम् ।
नानाफलसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥
ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्रप्रदातारं तारिष ऊर्ज्जं नो धेहि द्विपदे चतुष्पदे ॥
ॐ श्रीगणेशाय नमः नैवेद्यम् समर्पयामि ।

करोद्वर्तनकं–

ॐ चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम् ।
करोद्वर्तनकं देव ग्रहाण गणनायक ॥
ॐ श्रीगणेशाय नमः कस्तूर्यादिमिश्रितेन चन्दनेन करोद्वर्तनकं गन्धानुलेपनं समर्पयामि ।

अखण्डफलम्– यस मन्त्रले नरिवेल चढाउने

ॐ नारिकेरफलं जम्बू नारङ्गं दाडिमादिकम् ।
कूष्माण्डः पुरतो भक्त्या कल्पितं पतिगृह्यताम् ॥
इदं फलं मया देव स्थापितं पुरतस्तव ।
तस्मात्फलप्रदानेन सफलाः स्युर्मनोरथाः ॥

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
वृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वह्य हसः ॥ (शु. य. १२।८९)
ॐ श्रीगणेशाय नमः अखण्डफलानि समर्पयामि ।

ताम्बूलपूगीफलम्– यस मन्त्रले पानसुपारी चढाउने

ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत् ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ (शु. य. ३१।१४)
ॐ श्रीगणेशाय नमः एलादिचूर्णयुक्तां ताम्बूलवीटिकां समर्पयामि (अलाभे ताम्बूलं च समर्पयामि) ।

दक्षिणाद्रव्यम्– यस मन्त्रले दक्षिणा रुपैया पैंसा चढाउने

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्ति प्रयच्छ मे ॥
ॐ हिरण्यगर्भःसमवर्तताग्रे भूतस्य जातःपतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
ॐ श्रीगणेशाय नमः कृतयाः पूजायाः साद्गुण्यार्थे दक्षिणाद्रव्यं समर्पयामि ।

कर्तूरारार्तिक्यम्– यस मन्त्रले आरती गर्ने

ॐ कदलीभर्गसम्भूतं कर्पूरं तु सुदीपितम् ।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥
ॐ आ रात्त्रि पार्थिवँ रजः पितुरप्रायि धामभिः ।
दिवः सदाँसि वृहती वितिष्ठस आ त्वेषं वर्तते तमः ॥
ॐ श्रीगणेशाय नमः कर्पूरनीराजनं समर्पयामि ।

प्रदक्षिणा – यस मन्त्रले प्रदक्षिणा गर्ने

ॐ यानि कानि च पापानि ज्ञाताज्ञातकृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे॥
पदे पदे वा प्रतिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति।
तं सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परितः करोमि॥
ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः॥
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम्॥
ॐ श्रीगणेशाय नमः प्रदक्षिणां समर्पयामि।

यति पूजागरी सकि गणेशजीलाई दण्डवत् प्रणाम गर्नु त्यसपछि फूल अक्षता र चन्दन लिएर कलशको मुखमा पूजा गर्नु :

ॐ श्रीमन्महागणाधिपतये नमः।
ॐ विनायकादिपञ्चलोकपालेभ्यो नमः।
ॐ आदित्यादि नवग्रहेभ्यो नमः।
ॐ ईश्वराद्यधिदेवेभ्यो नमः।
ॐ अग्न्यादि प्रत्यधिदेवेभ्यो नमः।
ॐ इन्द्रादिदशदिक्पालेभ्यो नमः।
ॐ वीरभद्रादिएकादशरुद्रेभ्यो नमः।
ॐ गौर्यादिषोडाशमातृभ्यो नमः।
ॐ आवहादिसप्तमरुद्भ्यो नमः।
ॐ विनायक ब्रह्मविष्णु रुद्रार्कवनस्पतिभ्यो नमः।
ॐ इष्टदेवाताभ्यो नमः।
ॐ कुलदेवताभ्यो नमः।
ॐ ग्रामदेवाभ्यो नमः।
ॐ स्थानदेवताभ्यो नमः।
ॐ सर्वेभ्यो देवेभ्यो नमः।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः।
ॐ मातृपितृचरणकमलेभ्यो नमः।

ॐ एतत्कर्म प्रधानदेवताभ्यो नमः ।

ॐ नारायणाय नमः । ॐ पुण्यम पुण्याहम दीर्घमायुरस्तु ॥ अविघ्नमस्तु । भनी नमस्कार गर्ने ।

पुष्पाञ्जलिः— यस मन्त्रले हातमा फूल अक्षता लिने

ॐ नानासुगन्धपुष्पाणि यथाकलोद्भवानि च ।
पुष्पाञ्जलिर्मया दत्तो गृहाण गणनायक ॥
ॐ अम्बे अम्बिके अम्बालिके न मा नयति कश्चन ।
समस्त्यस्वकः सुभद्रिकां काम्पीलवासिनीम् ॥
ॐ श्रीगणेशाय नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ।

प्रार्थना— हातमा अक्षता फूल लिएर अञ्जली बाधी प्रार्थना गर्ने :

ॐ विध्नेश्वराय वरदाय सुरप्रियाय
लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रृतियज्ञविभूषिताय
गौरीसुताय गणनाथ नमो नमस्ते ॥१॥
भक्तार्तिनाशनपराय गणेश्वराय
सर्वेश्वराय शुभदाय सुरेश्वराय ।
विद्याधराय विकटाय च वामनाय
भक्तप्रसन्नवरदाय नमो नमस्ते ॥२॥
नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ।
नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥३॥
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे ।
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥४॥
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥५॥

॥ इति गणेश पूजनम् ॥

उमामहेश्वर पूजा प्रारम्भः

अब उमामहेश्वरको पूजाका लागि कर्मपात्रबाट तीन टुक्रा कुश लिएर पूजाको संकल्प गर्नेः–

संकल्प :

हरिः ॐ तत्सत् ३ः ॐ विष्णुः ३ अद्येह पूर्वसंकल्पसिद्धिरस्तु मम समस्तपापक्षयपूर्वकानेक जन्मपर्यन्ताखण्डितराज्य सौभाग्यादि विवृद्धये श्रीउमामहेश्वरप्रीत्यर्थं हरितालिकाव्रतमहं करिष्ये ॥ *भनी ब्राह्मणलाई कुशको टुक्रा हातमा राखि दिने।*

यसपछि कर्मपात्रको जलले सेचन गर्नुः

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
ॐ पुण्डरीकाक्षः पुनातु–३ ॐ पुण्डरीकाक्षाय नमः ३।

बालुकामये शिवलिङ्गे उमासहितं महेश्वरं आवाहनादिक्रमेण पूजयेत्।

ध्यानम्:

ॐ मन्दारमाला कुलितालकायै कपालमालंकितशेखराय । दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥

भो उमामहेश्वर इह आगच्छ इह तिष्ठ यावत् पूजा करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव वरदो भव।

ॐ उमामहेश्वराभ्यां नमः ध्यानं समर्पयामि। *भनी ध्यान गर्ने*

आवाहनम्– (आवाहन गर्ने मन्त्र)

ॐ नमस्ते रुद्र मन्यवऽउतोतऽइषवे नमः । बाहुभ्यामुत ते नमः ॥ एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले वृषभाधिरुढ।

ॐ देवदेव समागच्छ प्रार्थयेऽहं जगन्मय ।
इमां मया कृतां पूजां सुरसत्तम ॥
आवाहनं समर्पयामि श्रीउमामहेश्वराभ्यां नमः ॥

अथवा–

नमः शम्भवाय च मयोभवाय च नमः शंकराय च
मयस्कराय च नमः शिवाय च शिवतराय च ॥
आवाहनं समर्पयामि ॐउमामहेश्वरभ्यां नमः ।
आवाहनार्थे पुष्पं समर्पयामी ॥

आसनम्– (आशन राख्ने मन्त्र)

ॐ या ते रुद्र शिवा तनूरघोरा पापकाशिनी ।
तयानस्तन्वा शन्तमयागिरि शन्ताभिचकशीहि ॥
ॐ हर शम्भो महादेव विश्वेशामरवल्लभ ।
अनेकरत्नसंयुक्तमासनं प्रतिगृह्यताम् ।
ॐउमामहेश्वरभ्यां नमः आसनं समर्पयामि ॥

पाद्यम्– (पाउ पूजा गर्ने मन्त्र)

ॐ याामिषुङ्गिरिशन्त हस्ते विभर्ष्यस्तवे ।
शिवाङ्गिरित्रताङ्कुरु मा हि ७९सीः पुरुषञ्जगत् ।
ॐ जलं शुशीतलं चारु नानागन्धसमन्वितम् ।
पाद्यं गृहाण देवेश महादेव नमोऽस्तु ते ।
ॐउमामहेश्वरभ्यां नमः पाद्यम् समर्पयामी ।

अर्घ्यम् – (अर्घ चढाउने मन्त्र)

ॐ शिवेनवचसात्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मथ्९ सुमनाऽअसत् ।
ॐ श्रीपार्वती महाभागे शंकरप्रियवादिनि ।

अर्घ्यं गृहाण कल्याणि भर्त्रां सह पतिव्रते ॥

ॐउमामहेश्वरभ्यां नमः अर्घ्यम् समर्पयामी ॥

आचमनीयम् – (आचमनीयम् जल चढाउने मन्त्र)

ॐ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधराचीः परासुवः ॥
ॐ गंगाजलैः समानीतं सुवर्णकलशे स्थितम् ।
आचम्यतां महाभाग उमया सहितोऽनघ ॥

ॐउमामहेश्वरभ्यां नमः आचमनीयम् समर्पयामी ॥

स्नानम्– (गंगाजलले स्नान गराउने मन्त्र)

ॐ असौ यस्ताम्रोऽअरुणऽउत बब्भ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्राऽअभितो दिक्षु श्रिताः सहस्रशो वैषाꣳ हेडऽईमहे
ॐ गङ्गा सरस्वती रेवा पयोष्णी नर्मदाजलैः ।
स्नापितोऽसि मया देव ततः शान्तिं कुरुष्व मे ॥

ॐउमामहेश्वरभ्यां नमः स्नानीयं समर्पयामि ॥

पञ्चामृत चढाउने मन्त्रः

ॐ पयोदधिघृतं चैव शर्करामधुसंयुतम् ।

पञ्चामृतेन स्नपनं प्रीत्यर्थं प्रतिगृह्यताम् ॥

ॐउमामहेश्वरभ्यां नमः पञ्चामृत समर्पयामि ॥

शुद्धजल चढाउने मन्त्र

ॐ किरणाधूतपापा च पुण्यतोया सरस्वती ।
मणिकर्णीजलं शुद्धं स्नानार्थं प्रतिगृह्यताम् ॥

ॐउमामहेश्वरभ्यां नमः शुद्धोदकस्नानं समर्पयामि ।

वस्त्र चढाउने मन्त्रः

ॐ सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥
ॐउमामहेश्वरभ्यां नमः वस्त्रं समर्पयामि।

जनै चढाउने मन्त्रः

ॐ सुवर्णतन्तु ग्रथितं कार्तस्वरविभूषितम्।
यज्ञोपवितं देवेश गृहाण जगदीश्वर ॥
ॐउमामहेश्वरभ्यां नमः यज्ञोपवितं समर्पयामि।

गन्धोदकः (चन्दन मिसाएको जल चढाउँने)

ॐ त्वाङ्गन्धर्व्वा ऽअखनँस्त्वा मिन्द्रस्त्वाम्बृहस्प्पतिः।
त्वामोषधे सोमोराजा व्विद्वान्न्यक्ष्मादमुच्यत ॥
ॐ कुङ्कुमागरुकस्तूरीचन्दनं घनमिश्रितम्।
विलेपनं महादेव गन्धं दास्यामि भक्तितः ॥
ॐउमामहेश्वरभ्यां नमः गन्धं समर्पयामि।

अक्षता चढाउने मन्त्र–

ॐ अक्षन्नमीमदन्त ह्यव प्रियाऽ अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ ॐ रञ्जिताः कुङ्कुमौघेन अक्षताश्चातिशोभनाः।
भक्त्या समर्पितास्तुभ्यं प्रसन्नो भव शंकर ॥
अक्षतान् समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

अब उमालाई सिन्दूर, कज्जलं कञ्चुक्यादि सौभाग्यद्रव्यहरु चढाउने :

सिन्दूर चढाउने मन्त्रः

ॐ उदितारुणसंङ्काशं जपाकुसुमसन्निभम् ।
सीमन्तभूषणार्थाय सिन्दूरं देवि गृह्यताम् ॥

ॐ उमायै नमः सिन्दूरं समर्पयामि ॥

गाजल चढाउने मन्त्र :

ॐ यदञ्जने त्रैककुदं नेत्रसौन्दर्यसाधनम् ।
चक्षुषोः कञ्जलं धेहि देवि स्वर्णशलाकया ॥

ॐ उमायै नमः कञ्जलं समर्पयामि ॥

कञ्चुक्यादिसौभाग्यद्रव्याणि चढाउने मन्त्रः

ॐ कञ्चुकीमुपवस्त्रं च नानारत्नैः समन्वितम् ।
गृहाण त्वं मया दत्तं पार्वती च नमोऽस्तु ते ।
ॐ हरिद्रां कुङ्कुमं चैव सिन्दूरं कञ्जलान्वितम् ।
सौभाग्यद्रव्यसंयुक्तं गृहाण जगदीश्वरी ॥

ॐ उमायै नमः कञ्चुक्यादि सौभाग्यद्रव्याणि समर्पयामि ।

पुष्पाणि – (फूल चढाउने मन्त्र)

ॐ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँऽउत
अनेशन्नस्यै याऽइषवऽआभुरस्य निषङ्गधिः ॥
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाऽनीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ।

पुष्पाणि समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

अङ्गपूजा– (शिवस्य विशेषपूजा)

हातमा चन्दन, अक्षता, फूल लिएर भगवान् शिवको अङ्गपूजा गर्नुपर्छ। (पूजयामि भनेपिच्छे फूलअक्षता चढाउनुपर्छ।)

१. ॐ शङ्कराय नमः पादौ पूजयामि।
२. ॐ महेश्वराय नमः जंघे पूजयामि।
३. ॐ शम्भवे नमः जानुनी पूजयामि।
४. ॐ भूतेशाय नमः उरू पूजयामि।
५. ॐ नीललोहिताय नमः कटी पूजयामि।
६. ॐ उग्राय नमः नाभिं पूजयामि।
७. ॐ कृशानुरेतसे नमः उदरं पूजयामि।
८. ॐ हराय नमः स्तनौ पूजयामि।
९. ॐ नीलकण्ठाय नमः कण्ठं पूजयामि।
१०. ॐ शिवाय नमः मुखं पूजयामि।
११. ॐ त्रिनेत्राय नमः नेत्रं पूजयामि।
१२. ॐ रुद्राय नमः कर्णौ पूजयामि।
१३. ॐ ललाटाक्षाय नमः ललाटं पूजयामि।
१४. ॐ शर्वाय नमः शिरः पूजयामि।
१५. ॐ शम्भवे नमः सर्वाङ्ग पूजयामि।

धूपम्– (धूप चढाउने मन्त्र)

ॐ धूरसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः। देवानामसि बह्नितमꣳ सस्नितमं जुष्टतमं देवहूतमम्॥

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।
धूपं समर्पयामि ॐउमामहेश्वरभ्यां नमः॥

आचमनीयम् :

ॐ मलयाचलसंभूतं कर्पूरेण समन्वितम् ।

आचम्यतां जलं स्वच्छं प्रसन्नो भव सर्वदा ।

आचमनीयं समर्पयामि ॐ उमामहेश्वरभ्यां नमः ॥

ॐ करोद्वर्तनकं समर्पयामि ॐ उमामहेश्वरभ्यां नमः ॥

नैवेद्यम् – (नैवेद्य चढाउने मन्त्र)

ॐ अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ।

निशीर्यशल्ल्या नाम्मुखाशिवोनः सुमनाभव ॥

शर्कराघृतसंयुक्तं मधुरं स्वादुचोत्तमम् ।

उपाहारं समानीतं नैवेद्यं प्रतिगृह्यताम् ।

नैवेद्यं समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

ताम्बूलम् : पानसुपारी चढाउने मन्त्रः

ॐ इदं फलं मया देव स्थापितं पुरतस्तव ।

तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ताम्बूलं समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

दक्षिणाद्रव्यम्– (शिवजीलाईदक्षिणा चढाउने मन्त्र)

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातःपतिरेक आसीत् ।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो ।

अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।

दक्षिणा समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

आभूषणम् :

ॐ वज्रमाणिक्यवैदूर्यमुक्ताविन्दुसमन्वितम् ।

पुष्परागसमायुक्तं भूषणं प्रतिगृह्यताम् ।

दक्षिणा समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

दीपम् – (दीप दर्शाउने मन्त्र)

ॐ परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः ।

अथोयऽइषुधिस्तवारेऽ अस्म्मां .हितम् ॥

आज्यं च वत्तिसंयुक्तंवह्निना योजितं मया ।

दीपं गृहाण देवेश त्रलोक्यतिमिरापहम् ॥

दीपं समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

आवरण पूजन– (शिवको बाह्य आवरण पूजा गर्नें)

१. ॐ उमायै नमः । **२. ॐ गौर्य नमः ।**

३. ॐ पार्वत्यै नमः । **४. ॐ जगद्धात्र्यै नमः ।**

५. ॐ जगत्प्रतिष्ठायै नमः । **६. ॐ शान्तिरुपिण्यै नमः ।**

७. ॐ हराय नमः । **८. ॐ महेश्वराय नमः ।**

९.ॐ शंभवे नमः । **१०. ॐ शूलपाणये नमः ।**

११. ॐ पिनाकधृषे नमः । **१२. ॐ शिवाय नमः ।**

१३. ॐ पशुपतये नम. । **१४. ॐ महादेवाय नमः ।**

प्रदक्षिणा–

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च ।

तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदे पदे ॥

ॐउमामहेश्वरभ्यां नमः प्रदक्षिणां समर्पयामि ॥

नीराजनम्– (आरती चढाउने मन्त्र)

ॐ आ रात्रि पार्थिवॐरजः पितुरप्रायि धामिभः ।
दिवः सदाॐसि बृहती वितिष्ठसऽआत्वेषंवर्तते तमः ॥
ॐ चन्द्रादित्यौ च धरणविद्युदग्निस्तथव च ।
त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ॥

नीराजनं समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

कर्पूरार्तिक्यम्–

ॐ इदॐहविः प्रजननम्मेऽअस्तु दशवीरॐसर्वगणॐस्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ॥ अग्निः प्रजां बहुलाम्मे करोत्वन्नम्पयोरेतोऽअस्मासु धत्त ॥ कदलीगर्भसंभूतं घनसारं मनोहरम् । आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥

आरार्तिक्यं समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

अथवा–

ॐ कर्पूरगौरं करुणावतारं, संसारसारं भुजगेन्द्रहारम् ।

सदा वसन्तं हृदयारविन्दे, भवं भवानी सहितं नमामि ।

आरर्तिक्य समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

प्रदक्षिणाम् – (प्रदक्षिणा गर्ने मन्त्र)

ॐ मानो महान्तमुतमानोऽअर्भकम्मानऽउक्षन्त मुतमानऽउक्षितम् । मा नो वधीः पितरम्मोतमातरम्मानः प्रियास्तन्वो रूद्ररीरिषः ॥ यानि कानि च पापानि

जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणा पदेपदे ॥ प्रदक्षिणां समर्पयामि ॥

मन्त्रपुष्पाञ्जली– (फूलअक्षता लिएर हात जोड्ने)

ॐ मानस्तोके तनये मानऽआयुषि मानोगोयुमानोअश्वेषुरीरिषः । मानो वीरान्रुद्र भामिनोवधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

करचरणकृतं वाक्कायजं कर्मजं वा, श्रवणनयजनं वा मानसं वाऽपराधम् । विहितमविहितं वा सर्वमेतत्क्षमस्व जयजय करूणाव्धे। श्री महादेव शम्भो ॥

शिवशंकर विश्वात्मन् भूतेश्वर दयामय ।

भवत्स्मरणमात्रेण रक्ष नः पक्षवर्जितान् ॥

कर्पूरगौरं करूणावतारं संसारसारंभुजेन्द्रहारम् ।

सदावसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ।

ग्रहपीडाः प्रशाम्यन्तु भूतबाध विनश्यतु ।

ज्वरादयोऽखिला रोगाःविनश्यन्तु त्वदीक्षया ॥

श्रद्धया सिक्तया भक्त्या हार्दप्रेम्णा समर्पितः ।

मन्त्रपुष्पाञ्जलीश्चार्य कृपया प्रतिगृह्यताम् ।

सं बाहुभ्यां नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

मन्त्रपुष्पाञ्जलिं समर्पयामि श्रीउमामहेश्वरभ्या नमः ॥

नमस्कार गर्ने :

नमः सर्वहितार्थाय जगदाधारहेतवे ।

साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ॥

प्रार्थनापूर्वकं नमस्कारान् समर्पयामि ॐउमामहेश्वरभ्यां नमः ॥

क्षमापनम्-

आवाहनं न जानामि न जानामि तवार्चनम् ।
पूजां चैव नजानामि क्षमस्व परमेश्वर ॥१॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्य भावेन क्षमस्व परमेश्वर ॥२॥
भूमौ स्खलित पादानां भूमिरेवा वलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं मम ॥ ३॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत्पूजितं मया देव प्रसीद परमेश्वर ॥४॥
यदक्षर पदभ्रष्टं मात्राहीनं च यद्भवेत ।
तत्सर्वं क्षम्यतां देव ! प्रसीद परमेश्वर ॥५॥
कर्मणा मनसा वाचा पूजनं यन्मया कृतम ।
तेन तुष्टिं समासाद्य प्रसीद परमेश्वर ॥७॥
अपराध सहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्वं परमेश्वर ॥८॥
गतं पापं गतं दुःखं गतं दारिद्रयमेव च ।
आगता सुख सम्पत्तिः पुण्योऽहं तव पूजानात् ॥९॥
पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः ।
पाहि मां सर्वदा देव सर्वपापहरो भव ॥१०॥

प्रदक्षिणा-

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च ।

तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदे पदे ॥

अर्घ्य दिने मन्त्र–

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात् । ।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थदः ।
अनेन सफलाऽर्घ्येण फलदोऽस्तु सदा मम ॥
अर्घं निवेदयामि ॥

वायनम्[३] :

अन्नं सुवर्णपात्रसर्थं सवस्त्रफलदक्षिणाम् ।
वायनं गौरि विप्राय ददामि प्रीयते तव ॥
सौभाग्यारोग्यकामाय सर्वसम्पत्समृद्धये ।
गौरीगौरीशतुष्ट्यर्थं वायनं ते ददाम्यहम् ।
ॐ उमामहेश्वराभ्यां नमः ।

पूर्णपात्र पूजा गर्ने मन्त्र–

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहाऽइषमूर्जꣳ शतक्रतो ॥

पूर्णपात्र सङ्कल्प गर्ने मन्त्र– (कर्ताले हातमा जौ, तिल कुश फूल अक्षता सहित पूर्णपात्रलाई हातमा लिने)

ॐ अद्येत्यादि पूर्वसंकल्पसिद्धिरस्तु श्रीपरमेश्वरप्रीतये दीपगणेश कलश पूजनपूर्वकं कृतस्य हरितालिका व्रतस्य न्यूनातिरिक्त परिपूर्णार्थं इमां भूयसीं दक्षिणां यद्द्रव्यं दैवताकं

---

[३] देवपूजाको अन्त्यमा देवतामा चढाएर ब्राह्मणलाई दान गरिने मिष्टान्न र श्रृङ्गारको सामान, (फणिन्द्रप्रसाद पाण्डेय : वृहत् नेपाली संस्कृत शब्दकोष, पृष्ठ ११५४ ।)

नानानामगोत्रेभ्यो नानानामशर्मभ्यां ब्राह्मणेभ्यो यथाभागं विभज्य यथा कालेन दातुमहमुत्सृजेत । *भनी दक्षिणाको दुना कर्मपात्रमा राख्नु र ब्राह्मणलाई दिनु ।*

भूयसी दक्षिणासंकल्प–

ॐ अद्येह पूर्वसङ्कल्पसिद्धिरस्तु अमुक कामनासिद्धये कृतस्य हरितालिका व्रतं कर्मणः साङ्गतायै इमां दक्षिणा ......यथानाम दैवतां नानानाम गोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य यथाकाले दातुमहं जले उत्सृजेत् ।

विसर्जन गर्ने मन्त्र (चन्दन अक्षता फूल लिएर विर्सजन गर्दा भन्ने मन्त्र)

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ।
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ।
यत्र ब्रह्मादयो देवास्तत्र गच्छ सुरेश्वर ॥
आवाहनं न जानामि न जानामि तवार्चनम् ।
पूजां चैव नजानामि क्षमस्व परमेश्वर ॥१॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्य भावेन क्षमस्व परमेश्वर ॥२॥
भूमौ स्खलित पादानां भूमिरेवा वलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं मम ॥ ३॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत्पूजितं मया देव प्रसीद परमेश्वर ॥४॥
यदक्षर पदभ्रष्टं मात्राहीनं च यद्भवेत ।
तत्सर्वं क्षम्यतां देव ! प्रसीद परमेश्वर ॥५॥
कर्मणा मनसा वाचा पूजनं यन्मया कृतम ।
तेन तुष्टिं समासाद्य प्रसीद परमेश्वर ॥७॥

अपराध सहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽयमिति मां मत्वा क्षमस्वं परमेश्वर ॥८॥

कर्मेश्वरार्पण– तलको मन्त्रले कर्मअर्पण गर्नुः– हातमा लगाएको पवित्र फुकाएर जल समाती छोडिदिनु–

ॐ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयजनं वा मानसंवापराधम् । विहितमविहितं वा सर्वमेतत्क्षमस्व जयजय करुणाब्धे श्रीमहादेव शम्भो । ॐ कायेन वाचामनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृति स्वभावत् । करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेतत् ।

अब भगवान् अच्युतलाई संझेर नमस्कार गर्नेः–

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ ॐ अच्युताय नमः ३ *पटक भनी नमस्कार गर्ने।*

तलको मन्त्रले जुम्लाहात गर्ने–

ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मेविष्णुः प्रसीदतु ॥ ॐ विष्णवे नमः ३ ॥ यत्कृतं कर्मतन्यू नातिरिक्तं भगवद्वचनात् सर्वं परिपूर्णमस्तु ॥ ॐ अस्तुपरिपूर्णम् ॥

अभिषेक–कलशको जलले मंगलकामना सहित अभिषेक गर्ने मन्त्रः

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिविशान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ यतो यतः समीहसे ततो नोऽभयं कुरु। शं नः कुरु

प्रजाभ्यो भयन्नः पशुभ्यः ॥ सुशान्तिर्भवतु ॥ ॐ सर्वारिष्टशान्तिरस्तु । उत्तरोत्तरवृद्धिरस्तु । स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतर्द्दधातु ॥ विश्वानि देवसवितर्दुरितानि परासुव यद्भद्रं तन्नऽआसुव ॥

चन्दन अक्षता दही लिएर आफ्ना कुलदेवता, इष्टदेवता, स्थानीय देवताहरूलाई तलको मन्त्रोचारणसहित चढाउने–

हरिः ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽ इषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वा–नाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।

फूलटीका लगाई दिदा भन्ने मन्त्र–

ॐ स्वस्तिस्तुते कुशलमस्तु चिरायुरस्तु । गोवाजिहस्तिधन धान्यरस्तु ॥ ऐश्वर्यमस्तु विजयस्तु रिपुक्षयस्तुः । सन्तानवृद्धिः सहितंहरिभक्तिरस्तु ॥ निवसतु तव गृहे निश्चला सिन्धुपुत्री । प्रविसतु भुजदण्डे कालिका वैरी हन्ती ॥

ॐ श्रीर्वर्चस्व मायुष्यमारोग्यमाविद्यात्पवमानं महीपते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः शुभमस्तु, कल्याणंमस्तु ॥

रक्षाबन्धन बाँधिदिने मन्त्रः

ॐ त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः । रक्षा तोकमुतत्मना । येनबद्धो बलीराजा दानवेन्द्रोमहाबलः । तेन त्वामपि बध्नामि रक्ष मा चलमा चल ।

॥ इति हरितालिका पूजाविधि समाप्ता ॥

हरितालिका व्रतकथा प्रारम्भः

कथा सुन्ने स्रोताले हातमा चन्दन, अक्षता फूलपाती लिएर बस्ने

पुष्पाञ्जली

मन्दारमाला कुलितालकायै कपालमालीकतशेखराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नम शिवाय ॥

सूत उवाच

कैलासशिखरे रम्ये गौरी पृच्छति शंकरम् ।
गुह्याद्गुह्यतरं गुह्यं कथयस्व महेश्वर ॥१॥
सर्वेषां धर्मसर्वस्वमल्पायासान् महत् फलम् ।
प्रसन्नोऽसि यदा नाथ ! तथ्यं ब्रूहि ममाग्रतः ॥२॥
केन त्वं हि मया प्राप्तस्तपोदानव्रतादिना ।
अनादिमध्यनिधनो भर्ता चैव जगत् प्रभुः ॥३॥

ईश्वर उवाच

श्रुणु देवि ! प्रवक्ष्यामि तवाग्रे व्रतमुत्तमम् ।
यद्गोप्यं मम सर्वस्वं कथयामि तव प्रिये ॥४॥
यथा चोडुगणे चन्द्रो ग्रहाणां भानुरेव च ।
वर्णानाञ्च यथा विप्रो देवानां विष्णुरत्तमः ॥५॥
नदीषु च यथा गङ्गा पुराणानां तु भारतः ।

वेदानाञ्च यथा साम इन्द्रियाणां मनो यथा ।।६।।
पुराणं वेदसर्वस्वं आगमेन यथोदितम् ।
एकाग्रेण श्रृणुष्वैतत यथादृष्टं पुरातनम् ।।७।।
येन पुण्यप्रभवेण प्राप्तमर्द्धासनं मम ।
सर्वस्वं कथयिष्येऽहं त्वं मम प्रेयसी यतः ।।८।।
भाद्रे मासि सिते पक्षे तृतीया हस्त सोमयुक् ।
तदनुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ।।९।।
श्रृणु देवि ! त्वया पूर्वं यद्व्रतं चरितं महत् ।
तत्सर्वं कथयिष्यामि यथावृत्तं ।।१०।।

पार्वत्युवाच

कथं कृतं मया नाथ ! व्रतानामुत्तमं व्रतम् ।
तत्सर्वं श्रोतुमिच्छामि त्वत्सकाशान्महेश्वर ।।११।।

ईश्वर उवाच

आसीत्तत्र महादिव्यो हिमवान्नग उत्तमः ।
नानाभूतसमाकीर्णो नानाद्रुमसमाकुलः ।।१२।।
नानापक्षिसमायुक्तो नानामृगविचित्रितः ।
यत्र देवाः सगन्धर्वाः सिद्धचारणगुह्यकाः ।।१३।।
विचरन्ति यथा देवि ! गन्धर्वध्वनिसंकुलम् ।

स्फाटिकैः काञ्चनैः श्रृंगैमणिवैदूर्य्यभूषितैः ॥१४॥

भुजैर्लिखन्निवाकाशं सुहृदो मन्दिरं यथा।

हिमेन सहितो नित्यं गङ्गावनिविनादितः ॥१५॥

पार्वती त्वं तत्र बाल्ये परमञ्चाचरत् तपः।

अब्दद्वादशकं देवि! धूम्रपानमधोमुखी ॥१६॥

संवत्सरं चतुष्षष्ठिं पक्वपर्णाशनं कृतम्।

दृष्ट्वा कष्टं तव पिता चिन्तया दुःखितोऽभवत् ॥१७॥

नारदो मुनिशार्दूलः शैलपुत्रीं दिदृक्षया।

दत्वर्घ्यं विष्टरं पाद्यं नारदायोक्तवान् गिरः ॥१९॥

शैल उवाच

किमर्थमागतः स्वामिन्! वदस्व मुनिसत्तम!

महद्भाग्येन सम्प्राप्तं त्वदागमनमुत्तमम् ॥२०॥

नारद उवाच

श्रृणु शैलेन्द्र मद्वाक्यं विष्णुना प्रेशितोऽस्म्यहम्।

योग्यं योग्याय दातव्यं कन्यारत्नमिदं त्वया ॥२१॥

वासुदेवसमो नास्ति ब्रह्मा विष्णु शिवादिषु।

तस्मै देया त्वया कन्या अत्रार्थे तु मतं मम ॥२२॥

गिरिरुवाचः

वासुदेवः स्वयं देवः कन्यां प्रार्थयते यदि ।
तदा मया प्रदातव्या त्वदागमनगौरवात् ॥२३॥
इत्येवं गदितं श्रुत्वा तस्य त्वन्तर्दधे मुनिः ।
ययौ पीताम्बरधरं शङ्खचक्रगदाधरम् ॥२४॥
कृताञ्जलिपुटो भूत्वा मुनीन्द्रस्तमभाषत् ॥

नारद उवाच

श्रृणु देव भवत्कार्यं विवाहो निश्चितम् ॥२५॥
हिमवांस्तु तदा गौरीमुवाच वचनं मुदा ।
दत्तासि त्वं मया पुत्रि ! देवाय गरुडध्वजे ॥२६॥
श्रुत्वा वाक्यं पितुर्देवी सखीभिः सहिता वने ।
सिंहव्याघ्रमृगैर्व्याप्ते तत्र सुप्ता च निर्जने ॥२७॥

सख्युवाच

किमर्थं दुःखिता देवि ! कथयस्व ममाऽग्रतः ।
यत्ते भवत्यभिहितं करिष्येऽहं न संशयः ॥२८॥

पार्वत्युवाच

सखि प्रिये ! श्रृणुष्वाद्य मनोभिलषितं मम ।
कपर्दिनं च भर्त्तारं करिष्येऽहं न संशयः ॥२९॥
एतन्मे चिन्तितं कार्यं तातेन कृतमन्यथा ।

तस्माद्देहपरित्यागं करिष्येऽहं सखि ! प्रिये ॥३०॥
पार्वत्या वचनं श्रुत्वा सखी वचनमब्रवीत् ।
पिता यत्र न जानाति गमिष्यामो हि तद्वनम् ॥३१॥
इत्येवं सम्मतं कृत्वा नीतासि त्वं महद्वनम् ।
पिता निरीक्षयामास हिमवांस्तु गृहे गृहे ॥३२॥
केन नीतासि मे पुत्रि देव दानव किन्नरैः ।
नारदाय कृतं सत्यं किं दास्ये गरुडध्वजम् ॥३३॥
इत्येवं चिन्तयाविष्टो मूर्च्छितो निपपात ह ।
हा हा कृत्वा प्रधावन्ति लोकास्ते गिरिपुङ्गवन् ॥३४॥
ऊचुर्गिरिवरं सर्वे मूर्च्छा हेतुं गिरे वद ।
दुःखस्य हेतुं श्रृणुत कन्यारत्नं हृतं मम ॥३५॥
दृष्ट वा कालसर्पेण सिंहव्याघ्रेण वा हता ।
न जाने क्व गता पुत्री केन दुष्टेन वा हृता ॥३६॥
चकम्पे शोकसन्तप्तो वातेनेव महत्तरुः ।
गिरिर्वनाद्वनं यातस्तदालोकनकारणात् ॥३७॥
सिंहव्याघ्रैश्च भल्लूकैरहिभिः सहितं वनम् ।
त्वं चापि विपिने घोरे व्रजन्ती सखिभिः सह ॥३८॥
तत्र दृष्ट्वा नदीं रम्यां तत्तीरे च महगुहाम् ।

तां प्रविश्य सखीसार्द्धमन्नभोगविवर्जिता ॥३९॥
संस्थाप्य बालुकापिण्डं पार्वत्या सहितं मम ।
या तृतीया भाद्रपदे हस्तनक्षत्रसंयुता ॥४०॥
तत्र वादित्र गीतेन रात्रौ जागरणं कृतम् ।
तेन व्रतप्रभावेण आसनं चलितं मम ॥४१॥
सम्प्राप्तोऽहं तदा तत्र यत्र त्वं सखिभिः सह ।
प्रसन्नोऽस्मि मया प्रोक्तं वरं ब्रूहि वरानने ! ॥४२॥

पार्वत्युवाच

यदि देव प्रसन्नोऽसि भर्ता भवतु मे हर ।
तथेत्युक्त्वा तु तां देवीं कैलाशं पुनरागतः ॥४३॥
ततः प्रभावते सम्प्राप्ता नद्यां सर्वं विसर्जितम् ।
पारणं तु कृतं तत्र सख्या सार्द्धत्वया शुभम् ॥४४॥
हिमवानपि तं देशमाजगाम घनं वनम् ।
चतुराशा निरीक्षंस्तु विह्वलः पतितः पुनः ॥४५॥
तत्र दृष्ट्वा नदीतीरे प्रसुप्तं कन्यकाद्द्यम् ।
उत्थाप्योत्सङ्गमारोप्य रोदनं कृतवान् गिरिः ॥४६॥
सिंहव्याघ्रादि भल्लूकैर्वने दुष्टे कुतः स्थिताः ॥४७॥

पार्वत्युवाचः

श्रृण तता मया ज्ञातं त्वां दास्यसीश्वराय माम्।
तदन्यथा कृतं तात तेनाहं वनमागता ॥४८॥
ददासि तात ! यदि मां गिरिशाय तदा गृहम्।
आगमिष्यामि नैवञ्चेदिह स्थास्यामि निश्चितम् ॥४९॥
तथेत्युक्त्वा हिमवता तीतासि त्वं गृहं प्रति।
पश्चाद्दत्ता त्वमस्माकं कृत्वा वैवाहिकीं क्रियाम् ॥५०॥
तेन व्रतप्रभावेण सौभाग्यं साधितं त्वया।
अद्यापि व्रतराजस्तु न कस्यापि निवेदितः ॥५१॥
नामस्य व्रतराजस्य श्रृणु देवि ! यथाभवम्।
आलिभिर्हरिता यस्मात्तस्मात्सा हरितालिका ॥५२॥

पार्वत्युवाच

नामेवं कथितं तस्य विधिं वद मम प्रभो !
किं पुण्यं किं फलं चास्य केन च क्रियते व्रतम् ॥५३॥

ईश्वर उवाच

श्रृणु देवि ! व्रतं वक्ष्यं नारीणाव्रतमुत्तमम्।
करिष्यसि प्रयत्नेन यदि सौभाग्यमिच्छसि ॥५४॥
तोरणादिप्रकर्तव्यं कदलीस्तम्भमण्डितम्।
आच्छाद्य पट्टवस्त्रैस्तु नानावर्णविचित्रितैः ॥५५॥

चन्दनेन सुगन्धेन लेपयेद् गृहमण्डलम् ।
शङ्खभेरीमृदङ्गेश्च कारयेद बहुनिः स्वनैः ॥५६॥
नानामङ्गलगीतैश्च कर्तव्यं मम सद्मनि ।
स्थापयेद्बालुकालिङ्गं पार्वत्या सहितं मम ॥५७॥
पूजयेद् बहुपुष्पैश्च गन्धधूपादिभिर्नवैः ।
नानाप्रकारैर्नै वेद्यैः पूजयेज्जागरञ्चरेत् ॥५८॥
नारिकेलैः पूगिफलैर्जम्बी रैर्बकुलैस्तथा ।
बीजपुरैः सनारंगैः फलैश्चान्यैश्च भूरिशः ॥५९॥
ऋतुकालोद्भवैर्भूरिप्रकारैः कन्दमूलकैः ।
धूपदीपैर्गन्धपुष्पैर्मन्त्रेणानेन पूजयेत् ॥६०॥
नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने ।
नन्दिभृंगि महाकालगणयुक्ताय शम्भवे ॥६१॥
शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे ।
शिवायै सर्वमाङ्गल्यै शिवरुपे जगन्मये ॥६२॥
शिवे कल्याणदे ! नित्यं शिवरुपे नमोऽस्तु ते ।
शिवरुपे नमस्तुभ्यं शिवायै सततं नमः ॥६३॥
नमस्ते ब्रह्मरुपिण्यै जगद्धात्र्यै नमो नमः ।

संसारभयसन्तापात् त्राहि दमां सिंहवाहिनि ॥६४॥
येन कामेन देवेशि ! पूजितासि महेश्वरि !
राज्यसौभाग्यसम्पत्ति देहि मामम्ब पार्वति ॥६५॥
मन्त्रेणानेन देवि ! त्वां पूजयित्वा मया सह।
कथां श्रुत्वा विधानेन दद्यादन्नश्च भूरिशः ॥६६॥
ब्राह्मणेभ्यो यथाशक्त्या देया वस्त्र हिरण्य गाः।
अन्येभ्यो दीयते भूरि स्त्रीणां वा भूषणादिकम् ॥६७॥
भर्त्रा सह कथां श्रुत्वा भक्तिपुक्तेन चेतसा।
कृत्वा व्रतेश्वरं देवि ! सर्वपापैः प्रमुच्यते ॥६८॥
सप्तजन्म भवेद्राज्यं सौभाग्यञ्चैव वर्द्धते।
तृतीयायां तु या नारी आहारं कुरुते यदिव ॥६९॥
सप्तजन्मभ भवेद्वन्ध्या वैधव्यं जन्मजन्मनि।
दारिद्र्यं पुत्रशोकञ्च कर्कशा दुःखभागिनी वा॥७०॥
पच्यते नरके घोरे नोपवासं करोति या।
राजते काञ्चने ताम्रे थाथ मृण्मये ॥७१॥
भाजने विन्यसेदन्नं सवस्त्र फल दक्षिणाम्।
वायनं हिजवर्य्याय दद्यादन्नं च पारणम् ॥७२॥

एवं विधिं या कुरुते च नारी त्वया समाना रमते स्वभर्त्रा।
भोगाननेकान् भुवि भुज्यमाना सायुज्यमन्ते लभते नरेण ॥७३॥
अश्वमेघ सहस्राणि वाजपेय शतानि च।
कथा श्रवणमात्रेण तत्फलं प्राप्यते नरैः ॥७४॥
एतत्ते कथितं देवि ! तवाऽग्रे व्रतमुत्तमम्।
कोटियज्ञकृतं पुण्यं यस्याऽनुष्ठानमात्रतः ॥७५॥

॥ इति श्री भविष्योत्तर पुराणे हरितालिका व्रतकथा समाप्ता ॥

नोटः हरितालिकाको पूजा गरिसकेपछि व्रतकथा धेरै ठाउँमा भन्ने चलन नभएकाले नेपालीमा भावानुवाद नगरिएको हो।

धार्मिक दृष्टिले कुनकुन कार्यगर्दा पापको भागीदार हुनुपर्छ : :

वराहपुराणमा उल्लेख भएअनुसार धार्मिक अपराधमा अध्यारोमा पूजागर्दा, पूजा नसकि काम गर्दा, बासीफूल चढाउदा, जूठोमुखले पूजागर्दा, घण्टीनबजाई मन्दिरमा प्रवेश गर्दा, झुठोबोल्दा, नैवेद्य चोर्दा, परपत्नीहरण गर्दा, विश्वासघात गर्दा, आशादेखाएर निराशापार्दा, एउटा बाहुनलाई अर्पण गरेको सामान अर्को बाहुनलाई दिंदा पाप लाग्ने हुनाले यस्तो कार्य नगर्दा नै वेश हुनेछ ।

स्कन्दपुराणअनुसार पतिव्रता नारीहरु : अरुन्धती, सावित्री, अनुसुया, शाण्डिली, सती, लक्ष्मी, शतरुपा, सुनीति, संज्ञा, स्वाहा हुन्।

धर्ममन्थनअनुसार कुनै पनि दोष नलाग्ने नारीहरुः अहिल्या, द्रौपदी, मन्दोदरी, तारा; कुन्ती, यी ५ जना नारीलाई शास्त्रीय दृष्टिकोणले कुनै पनि दोष छैन।

आरती कसरी गर्नेः भगवानलाई आरती देखाउँदा खुट्टामा ४ पटक, नाभीमा २, मुखमा १, अंगमा ७ पटक गरी जम्मा १४ पटक आरती देखाउनुपर्छ। *(स्रोतः नारद पुराण)*

मन्दिर परिक्रमा गर्ने नियमः सूर्यको मन्दिरलाई ७ पटक, गणेश मन्दिरमा ३ पटक, विष्णु मन्दिरमा ४ पटक, भगवती मन्दिरमा १ पटक र शिवमन्दिरमा दायाँ वायाँ गरी ३ पटक परिक्रममा गर्नुपर्छ। *(स्रोतः शिव र गरुढपुराणमाबाटलिइएको)*

ऋषिपञ्चमी पूजा विधिसहित व्रतकथा

(नेपालीमा विधिनिर्देश र भावार्थसहित)

॥श्रीगणेशाय नमः ॥

ऋषिपञ्चमी पूजाविधि प्रारम्भः

ऋषिपञ्चमीको पूजा मध्याह्नव्यापिनी अर्थात् दिउँसोको समयमा गर्ने शास्त्रीय विधान छ । पूजागर्ने नारीले पञ्चमीको दिन बिहानै उठेर नित्यकर्म सकी नदी, कुवा, सरोवर, पधँरो वा तलाउमा गएर पूर्वमुख गरेर ३६० वटा दत्तिवन दाँतमा लगाउनु पर्छ । दत्तिवन लगाउनु भन्दा पहिले तलको मन्त्रले प्रार्थना गर्नु:

ॐ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्मप्रज्ञां च मेधां त्वन्नो देहि वनस्पते ॥

त्यसपछि दत्तिवन लगाउदा तलको मन्त्र भन्नु:

ॐ मुखदौर्गन्धनाशाय दन्तानां च विशुद्धये ।
ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥

यसमन्त्र भन्दै ३६० वटा दत्तिवनले दाँत माझ्नु र ३६० पटक माटो लगाउनु भन्ने छ । आधुनिक धारणा अनुसार ३६० पटक साबुनपानीले धुनुपर्छ भन्ने हो । दत्तिवनको पातले अभिषेक गर्नु । आचमन गरी पञ्चगव्य खाएर शुद्धवस्त्र धारण गरी शुद्धआसनमा बसी पण्डितद्वारा पूजा आरम्भ गर्नु । दीप, गणेश, कलश स्थापना गरी पूजागर्नु यसको माझमा चामल राखि कुशका सप्तऋषि बनाउन लगाई लहरै सप्तऋषिहरु स्थापना गर्नु त्यसपछि अर्घपात्र र शंख स्थापना गरी कर्मपात्र बनाउने शरीर शुद्धिका लागि गोदान कर्म गर्न लगाउने ।

इति मन्त्रेणदन्तान् संशोध्य ३६० मृत्तिकालेपनं ३६० अपमार्गपत्रैरभिषेचनपूर्वकं इति स्नानं विधाय शुद्धे वाससी परिधाय

पूजास्थानमागत्य पञ्चगव्यं प्राश्य आसने उपविश्याऽऽचम्य दीपं प्रज्वाल्य कर्मपात्रं विधाय प्रायश्चित्तगोदानं कुर्यात्।

पूजाविधि प्रारम्भः

यस मन्त्रले आचमन गर्ने–

ॐ अच्युताय नमः स्वाहा। ॐ केशवाय नमः स्वाहा।
ॐ माधवाय नमः स्वाहा।

यस मन्त्रले हात धुने **ॐ गोविन्दाय नम स्वाहा ।**

कर्मपात्रनिर्माणविधिः

कर्ताले पञ्चगव्य प्राशन गरेपछि आसनमा बसी तीनपटक आचमन गरेपछि ***ॐ आधारशक्तये नमः*** *भनी आफ्नो अघिल्तिर दाहिनेपट्टि भूइँमा अलिकति फूलअक्षताहरु चढाएर त्यसमाथि तामाको एउटा चोखो भाँडो वा थाली राख्नुपर्छ। त्यसपछि तल लेखिएअनुसार मन्त्रहरु पढ्दै कर्मपात्र बनाउँदै जानुपर्छ।*

कर्मपात्र राख्ने ठाउँमा फूलअक्षता लिई छुने–
तीन कुशकण्डिकाले कर्मपात्रको स्थापना गर्ने:-

ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम्। अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वथं̐ हसः॥१॥ ॐ यदि दिवा यदि नक्तमेनाथं̐ सि चकृमा वयम्। वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वथं̐ हसः॥२॥ ॐ यदि जाग्रद्यदि स्वप्नऽ एनाथं̐ सि चकृमा वयम्। सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वथं̐ हसः॥३॥ *भनी अक्षतापुञ्जमाथि कर्मपात्रको स्थापना गर्नुपर्छ।*

कर्मपात्रमा पवित्र र कुशका टुक्राहरू राख्ने मन्त्र–

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। *यो मन्त्र पढ्दै कर्मपात्रमा पवित्र राख्नुपर्छ।*

शुद्धजल राख्ने मन्त्र–

ॐ शं नो देवीरभिष्टयऽ आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः ॥

फूल राख्ने मन्त्र–

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वेनक्षत्राणि रुपमश्विनौ व्यात्तम् ।

इष्णन्निषाणामुं मऽइषाण सर्वलोकं मऽइषाण ॥

जौराख्ने मन्त्र–

ॐ यवोसि यवयास्मद्देषो यवयारातीर्दिवे त्वान्तरिक्षाय

त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृँषदनाः पितृषदनमसि

तिलराख्ने मन्त्र–

ॐ तिलोसिसोमदैवत्यो गोसवोदेवनिर्मितः ।

प्रत्नमद्भिपृक्तः स्वधया पितृँल्लोकान्पृणाहिनः स्वाहा ॥

चन्दन राख्ने मन्त्र–

ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्याङ्करीषिणीम् ।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

अक्षता राख्ने मन्त्र–

ॐ अक्षन्नमीमदन्तह्यवप्रिया ऽअधूषत ॥

अस्तोषतस्वभा नवो विप्रा नविष्ठयामती योजान्विन्द्र ते हरी ॥

अभिमन्त्रण गर्ने–

ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वᳬहसः ॥१॥ ॐ यदि दिवा यदि नक्तमेनाᳬसि चकृमा वयम् । वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वᳬहसः ॥२॥ ॐ यदि जाग्रद्यदि स्वप्नऽ एनाᳬसि चकृमा वयम् । सूर्यो मा

तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः ॥३॥ *यी तीन मन्त्रले कर्मपात्रको जललाई विस्तारै चलाउदै अभिमन्त्रण गर्नुपर्छ।*

अब दाहिने हातको बूढी औंला र साहिली औंलाले चलाई कर्मपात्रमा रहेका तीनवटा कुशको टुक्रा लिई जलले आफूलाई र पूजनसामग्रीलाई सेचन गर्ने–

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनातु–३ ॐ पुण्डरीकाक्षाय नमः ३ ।

त्यसपछि कुशका तीनवटा टुक्राले आफूलाई सेचन गर्ने।

कर्मपात्रमा भएको पवित्रलाई धारण गर्ने–

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥

यस मन्त्रले सरस्यूँलाई चारैतिर छर्कनु

ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥१॥
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रत्यं तत्र गच्छतु ॥२॥

प्रायश्चित्तगोदान

कर्मपात्रको निर्माण गरिसकेपछि प्रायश्चित्त गोदान गर्नुपर्छ।

यजमानले– गाई भए गाईदान वा गाई नभए गाईको मूल्यसम्झेर गाईको मूल्य बराबरको पैसा (निष्क्रय), गोबर चाँदी एवं तामाका रूपियाँ पैसा टपरी/बोहोतामा राखी फूल अक्षताले पूजा गर्ने

ब्राह्मणले– तलका मन्त्रले गाईको पूजागर्ने :

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः । ॐ इरावती धेनुमतीहि भूतꣳ सुयवसिनीमनवेदशस्या । व्यस्कभ्ना रोदसी

व्विष्णवेतेदाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा ॥ ॐ गवे नमः गौरुपद्रव्येभ्यो नमः *गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥*

अब यसमन्त्रले ब्राह्मणलाई टीका लगाइदिनेः

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।

जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ॐ ब्राह्मणाय नमः ।

कुशका तीनवटा टुक्रा लिएर तलको मन्त्रले तर्पण गर्ने–

माथि गोदानमा छुट्ट्याइएको दुना/टपरीको पैसा कुशको टुक्राले त्यहींको जलले आफूलाई सेचन गर्नेः–

ॐ मनोमेतर्पयत, वाचम्मेतर्पयत, प्राणम्मेतर्पयत, चक्षुर्मेतर्पयत, श्रोत्रम्मेतर्पयतात्मानंमेतर्पयत, प्रजां मे तर्पयत, पशून्मे तर्पयेत, गणान्मे तर्पयत ॐ गणा मे मा वितृषन् ॥

यजमानले– कुशका टुक्रा लिएर तलको मन्त्रले मार्जन गर्ने ।

ॐ आपो हिष्ठामयोभुवः । ॐ स्तानऽउर्जे दधातन ॥ ॐ महेरणाय चक्षसे । ॐ यो वः शिवतमो रसः ॥ ॐ तस्य भाजयतेह नः । ॐ उशतीरिव मातरः ॥ ॐ तस्माऽअरं गमाम वो यस्य क्षयाय जिन्वथ । ॐ आपो जनयथा च नः ॥

गोदानसंकल्प

कर्ताले– जलसहित कुशका तीनटुक्रा, जौ, तिल र जललिएर दुना वा बोहोतालाई छोइराख्ने र ब्राह्मणले गोदान संकल्प भन्ने–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येह श्रीमद्भगवतो महापुराणपुरुषस्य विण्णोराज्ञया प्रवर्तमानस्य सकलजगतः सृष्टिकारिणो ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे प्रह्लादाधिपत्ये मनौ सप्तमे वैवस्वतमन्वन्तरे सत्यत्रेताद्वापरान्ते बौद्धावतारे अष्टविंशतितमे कलियुगे तस्य प्रथमचरणे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्ते गङ्गादेव्या उत्तरदिग्भागे हिमाचलस्य दक्षिणपार्श्वे नेपालदेशे पाशुपतक्षेत्रे पशुपतेः

गुह्यकाल्याश्च (अमुक) दिग्भागे (अमुक) नगरे, ग्रामे वा इह पुण्य भूमौ षष्टिसंवत्सराणां मध्ये (अमुक) नाम्निसंवत्सरे श्रीसूर्य (अमुकायने) (अमुक) ऋतौ मासे (अमुक) पक्ष (अमुक) तिथौ (अमुक) वासरे (अमुक) राशिस्थिते श्रीसूर्य (अमुक) राशिस्थिते देवगुरौ (अमुक) राशिस्थिते चन्द्रमसि अन्येषु शेषुग्रहेषु यथायथा राशिस्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्यान्वितायां शुभपुण्यतिथौ (अमुक) गोत्रः (अमुक) प्रवरः सपत्नीकः पुत्रादिपरिवारसहितः (अमुक) शर्माहं (नामाहं) सकलपापक्षयपूर्वकं नूतन गृहस्य निर्विघ्नं स्थिरत्वावाप्तिपूर्वकं दीर्घमार्युरोग्यैश्वर्यादिवि बृद्धये सप्तर्षिपूजां कर्म च इमां प्रायश्चित्तीभूतां गां रुद्रदैवताकां द्रव्यं वनस्पति दैवतं अमुकगोत्राय सुपूजिताय ब्राह्मणाय प्रायश्चित्त गोदानत्वेन कर्म च करिष्ये।

कर्ताले - ब्राह्मणलाई कुशको टुक्रा हातमा राखि दिने र ब्राह्मणले - **ॐ स्वस्ति** *भनी कुश लिने।*

गाईको प्रार्थना- (यजमानले- फूलअक्षता लिएर गाईको प्रार्थना गर्ने)-

ब्राह्मणले- तलको मन्त्र भन्ने-

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि । सर्वदेवमयी यस्मात् तस्मात् शान्तिं प्रयच्छ मे ॥ ॐ गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ *यसपछि यजमानलाई जलले सेचन गरिदिनुपर्छ।*

दानप्रतिष्ठाः

जलकुशको टुक्रा लिएर प्रतिज्ञा संकल्प गर्ने- अब आफूले अर्पण गरेको पैसालाई भुइँमा राखी फूलअक्षताले पूजा गर्नेः-

ॐ स्वर्ण धर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्ण शुक्रः स्वाहा स्वर्णज्योतिः स्वाहा सर्वर्णसूर्यः स्वाहा ॥ *भनी पूजा गर्ने।*

त्यसपछि कुशको टुक्रा लिएर संकल्प गरिएको पैसालाई हातम लिने

ॐ अद्यकृतैतत् गोदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं इमां दक्षिणां यथा नामगोत्राय शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ भनि ब्राह्मणलाई दिने ।

अब ब्राह्मणले **ॐ स्वस्ति इति प्रतिवचनम्** *भनी गोदान प्रतिष्ठा लिनु ।*

गाईको प्रदक्षिणा (जलले प्रदक्षिणा गर्दै मन्त्र भन्ने)–

ब्राह्मणले तलको मन्त्र भनिदिने–

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदेपदे ॥ *(भावार्थः जन्मजन्मान्तरमा गरिएका जुनसुकै पापहरू भए पनि । प्रदक्षिणाको पाउपाउमा सबै पापहरु नासिऊन् ।)*

अब गोदानलाई अलि परसारेर नमस्कार गर्ने[4] –

ॐ नमस्ते कपिले देवि संसारार्णवतारिणि ।
द्विजेन्द्राय ददामि त्वा प्रसन्नो भव सर्वदा ।

ब्राह्मणले– कर्तालाई टपरीमा राखेको गोबर जलबाट तीन्टुक्रा कुशलिई जलले अभिषेक गरिदिने–

ॐ कोदात्कस्माऽअदात्कामोदात्कामायादात् ।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते ।

अभिषेक स्वास्तिवाचन– ब्राह्मणले तलको मन्त्रले स्वस्तिवाचन गर्ने–

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिविशान्ति राप: शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ यतो यतः समीहसे ततो नोऽभयं कुरु । शं नः कुरु प्रजाभ्यो भयन्नः पशुभ्यः ॥

---

4 *गोदान प्रतिष्ठालाई उचाल्न हुँदैन, अधिकांश (यजमान) कर्ताले अन्जानमा उचाल्ने गर्दछन् ।*

सुशान्तिर्भवतु ॥ ॐ सर्वारिष्टशान्तिरस्तु । उत्तरोत्तरवृद्धिरस्तु । *भनेपछि नमस्कार गरी फूल अक्षता यज्ञको सबैतिर छर्की दिने ।*

प्रतिज्ञासंकल्प– कर्ताले हातमा जौ तिल पानी लिने:

हरिः ॐ तत्सत् ३ः ॐ विष्णुः ३ इत्यादि पूर्वसंकल्पसिद्धिरस्तु अद्येय देशकालौ स्मृत्वा अमुक गोत्रः, अमुक शर्मा अहं मम इह लक्षवर्तिकाकर्मणि दीप कलश गणेश पूजनपूर्वकं स्थैर्यसिद्धये आयुरारोग्य पुत्रपौत्राद्विपद चतुष्पदधन धान्यादिसमृद्धये शिवप्राप्तये च नन्दादि पञ्चदेवताः स्थापन पूजनपूर्वक श्रीसाम्बसदाशिवपूजनं कर्म अहं करिष्ये । *भनि कुश छोडी दिने ।*

ब्राह्मणवरणम्

ब्राह्मणवरण गर्नका लागि कर्मपात्रको जौ, तिल, कुश, जल, चन्दन, दूवो, अक्षता, पान, सुपारी, वस्त्र, द्रव्य पात्रमा राखी पूर्व फर्केर संकल्प गरी वरण गर्ने, वरण गर्दा सर्वप्रथम पुण्याहवाचन गरिदिनुहोस् भनी ब्राह्मणलाई आग्रह गर्ने ।

सङ्कल्प–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ इत्यादिदेशकालादीन् सङ्कीर्त्य (अमुक) गोत्रः (अमुक) प्रवरः (अमुक) शर्माहं मम (अमुक) कर्मणि कृताकृतावेक्षणादिरुपब्रह्मकर्मकर्तुं तथा च (अमुक) कर्मणि प्रतिदेवतानां मुखे साज्यभागान्तमाहवनीयद्रव्य युतहोमकर्मकर्तुं तथा च (अमुक) कर्मणि तत्तत्कर्मविहितोप योग्याचारकर्मकर्तुं तथा च (अमुक) कर्मणि चतुर्वेदोक्तमन्त्र जपपाठकर्मकर्तुं अमुकनामगोत्रान् अमुकनामशर्मणो ब्राह्मणानेभिश्च चन्दनपुष्पाक्षत ताम्बूलपूगीफलवासोद्रव्य सोद्रव्याभरणादिभिर्गणपतिब्रह्मा होत्राचार्यत्वेन जापकपाठकत्वेन ऋत्विक्त्वेन च युष्मानहं वृणे । ॐ वृताः स्म *इति ब्राह्मणाः ब्रूयुः* । यथा विहित कर्म कुरुत । करवामः । *त्यसपछि ब्राह्मणहरूले–* ॐ वृताः स्म (*वरण गरियौं) भन्ने ।*

ब्रह्माप्रार्थनाः (फूलअक्षता लिएर ब्रह्माको प्रार्थना गर्ने)

ॐ यथा चतुर्मुखो ब्रह्मा सर्ववेदाविशारदः । तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥

आचार्य प्रार्थना : (आचार्यको प्रार्थना गर्ने)–

ॐ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ।
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रंत ॥

यजमानले– **ॐ यथाविहितं कर्म कुरुत–** *(जे गर्नुपर्ने कर्म हो गर्नुहोस्)*

ब्राह्मणले– **ॐ यथाज्ञानं करवामः** *(आफूले जानेअनुसारको हवस गर्छौं) भन्नु।*

यसपछि दीयो बाल्ने :

दीपपूजनम्

तलको मन्त्रले दीयो बाल्ने–

ॐ स्थिरोभव व्वीड्वङ्गऽआशुर्ब्भव व्वाज्ज्यव्वन् । पृथुर्ब्भव सुषदस्त्वमग्नेः पुरीषाबाहणः ॥

दीपकको पूजा गर्ने मन्त्र– (चन्दन अक्षता फूलपातीले दियोको पूजा गर्ने)

ॐ पृष्ट्ये दिवि पृष्ट्ये अग्निः पृथिव्यां पृष्ट्ये विश्वा ओषधीरा विवेश वैश्वानरः सहसा पृष्ट्ये अग्निः स नो दिवा स रिषस्पातु नक्तम् ॥ भनी पूजा गर्ने । **कर्मसाक्षिणे दीप नारायणाय नमः** *भनी पूजा गरी शुद्धजल, अर्घ, चन्दन, पञ्चामृत, वस्त्र, सिन्दूर, तिल, जौ, धूप, फूलअक्षता समर्पयामि* ***ॐ दीपनारायणाय नमः*** *भनी चढाउने।*

कर्ताले फूलअक्षता लिएर दीयोको प्रार्थना गर्ने –

सुप्रकाशो महादीप्तः सर्वतस्तिमिरापहः ।
स बाह्यभ्यन्तरज्योतिर्दीपोऽयं प्रतिगृह्यताम् ।
ॐ नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्ते केशवानन्त वासुदेव नमोऽस्तुते ॥

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तुते ॥
ॐ शुभं भवतु कल्याणं आरोग्यसुखसम्पदम् ।
सर्वशत्रुविनाशाय दीपज्योतिर्नमोऽस्तु ते ॥

कलशपूजनम् :

अब कलशको स्थापना र पूजा गर्ने विधिः

भूमिशोधनम्– (हात्तमा फूल अक्षता लिएर तलको मन्त्र पढी भूमि छुने)

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥

धानराख्ने मन्त्र– (सप्तधान्य वा धानचामल राख्नु)

ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥

कलश राख्ने मन्त्र– (धान चामल माथि कलश राख्नु)

ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः । पुनरुर्जा निवर्तस्व सानः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ।

तीर्थजल/गंगाजल राख्ने– (यसमन्त्रले कलशमा जल भर्ने कार्य गर्नु)

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥

सर्वौषधी राख्ने– (यसमन्त्रले सर्वौषधी राख्नु)

ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा । मनै
बभ्रूणामहᳬशतं धामानि सप्त च ॥

तलको मन्त्रले पञ्चरत्न राख्ने–

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जात
पतिरेकऽआसीत् । स दाधार पृथिवीं द्यामुते माङ्कसमै देवाय
हविषा विधेम ॥

तलको मन्त्रले फल चढाउने मन्त्र-- (फल वा सिंगो सुपारी राख्ने)

ॐ याः फलानीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणी
बृहस्पतिप्रसुतास्तनो मुञ्चन्त्व ᳬ हसः ।

तलको मन्त्रले जौ राख्ने–

ॐ यवोऽसि यवयास्मद्द्वेषो
यवयारातीर्दिवेत्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः
पितृषदनाः पितृषदनमसि ॥

तलको मन्त्रले गन्ध (श्रीखण्ड चन्दन) राख्ने–

ॐ गन्धद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

तलको मन्त्रले दूवोराख्ने–

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च । (शु.य.१३।२०)

सप्तमृत्तिका (सातठाउँको माटो) राख्ने –

ॐ स्योना पृथिवी नो भवा नृक्षरा निवेशनी । यच्छा
नः शर्म सप्रथाः । (शु.य. ३६।१३)

पञ्चपल्लव राख्ने मन्त्र–*

ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।

गोभाजऽइत्किलासथयत्सनवथ पूरुषम् ॥ (शु.य.१२।७९)

वस्त्र (कपडा) चढाएर बेरि दिने–

ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ उपयामगृहीऽतोसि बृहस्पतयेत्वैषते योनिर्बृहस्पतये त्वा ॥ (शु.य.२३...)

यसमन्त्रले कलशको मुखमा आँप चाँप पिपलको पात राख्ने–

ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन ।

ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ।

कलशमा वरुण देवताको आवाहन गरी पूजा गर्ने–

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेहवोद्धयुरुशꣳस समानऽआयुः प्रमोषी ॥ (शु.य.१८।४९)

ॐ साङ्गसपाशसपरिवार वरुण इह आगच्छ इह तिष्ठ मम पूजां गृहाण यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव ॥ अहेडमानो वरुणेह बोद्धयुरुशꣳस समानऽआयुः प्रमोषी ॥

वरुणको प्रार्थना गर्ने मन्त्र–

वरुण त्वं महाभाग सर्वदेवप्रपूजित ।

---

* पञ्चपल्लवभित्र वर, पीपल, आँप, डुम्री र पाखुरीका पातहरू पर्दछन् ।

वितते मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा ॥

गंगादि तीर्थहरूको आवाहन गर्ने –

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।

आयान्तु यजमानस्य दुरितक्षयकारकाः ।

अभिमन्त्रण गर्ने :– (कलशको मुखदेखि पिंधसम्म छुनलगाएर भन्ने)

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः मूलेत्वस्य स्थितो ब्रह्मामध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सप्तसप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथयजुर्वेदः सामवेदोऽप्यथर्वणः ॥ अंगैश्चसहिता सर्वेकलशं तु समाश्रिताः ।

पञ्चोपचार वा षोडशोपचारले पूजा गर्ने–

आसनं, पाद्यम्, अर्घम्, आचमनीयम्, पञ्चामृत-स्नानम्, शुद्धोदकस्नानम्, वस्त्रम्, गन्धम्, अक्षतान्, सिन्दूरम्, यवतिलान, पुष्पं, माल्यं, धूपं, दीपं, नैवेद्यं, ताम्बूलम्, द्रब्याभरणादीनि च समर्पयामि– ॐ साङ्गायसपरिवाराय सायुधाय सवाहनाय स्वशक्तिसहिताय वरुणाय नमः ।

कलश प्रार्थना गर्ने–

ॐ देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । वंत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ ॥ इति कलश प्रार्थना ॥

गणेशपूजा–

अब गणेशको पूजा गर्ने हातमा जौ, तिल, कुश र कर्मपात्रको जल लिएर सङ्कल्प गर्ने–

हरि ॐ तत्सत् ३ ॐ विष्णु ३ पूर्वसङ्कल्पमुच्चयार्थ, अमुक गोत्राय अमुक शर्माहं मम कर्मणः निर्विघ्नंपरिसमाप्त्यर्थं यथा संपादितोपचारै श्रीमन्महागणपतिपूजनमहं करिष्ये॥

गणेशको आवाहन गर्ने– (फूलअक्षता लिएर आवाहन गर्ने)

ॐ गणानान्त्वा गण १ँ हवामहे प्रियाणान्त्वा प्रियपति१ँ हवामहे निधिनान्त्वा निधिपति१ँ हवामहे वसोमम। आहमजानि गर्ब्भधमात्वमजासि गर्ब्भधम् ॥ ॐ हे हेरम्ब त्वमेह्येहि अम्बिका त्र्यंवकात्मज । सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभयुतः शिव । नागस्य नागहार त्वं गणराज चतुर्भुज भूषित्त स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य गृहाण त्वं पूजां क्रतुं च रक्षा माम् ॥ ॐ भुर्भूवः स्वः गणपतयेसिद्धिवुद्धि सहिताय सायुधाय सवाहनाय सपरिवारय इदमासनं श्रीमन्महागणाधिपते ! इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव।

आसन दिने :–

ॐ विचित्ररत्नखचितं दिव्यास्तरणसंयुतम्।
स्वर्णसिंहासनं चारु गृह्णीष्व सुरपूजित ॥
ॐ पुरुष एवेद १ँ सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशनो यदन्नेनातिरोहति ॥ (शु. य. ३१।२)
आसनार्थे अक्षतान् समर्पयामि।

पाद्यम् – *यस मन्त्रले पाउ पूजा गर्ने –*

ॐ सर्वतीर्थसमुद्भूतं पाद्यं गन्धादिभिर्युतम् ।
विघ्नराज ! गृहाणेमं भगवन् ! भक्तवत्सल ! ॥
ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोऽस्य व्विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ (शु. य. ३१।३
पादयोः पाद्यं समर्पयामि ।

अर्घ्यम्– *यस मन्त्रले अर्घ दिने–*

ॐ गणाध्यक्ष ! नमस्तेऽस्तु गहाण करुणाकर ! ।
अर्घ्यं च फलसंयुक्तं गन्धपुष्पाक्षतैर्युतम् ॥
ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत् पुनः ।
ततो विष्वं व्यक्रामत् साशनानशने अभि ॥ (शु. य. ३१।४)
हस्तयोरर्घ्यं समर्पयामि ।

आचमनीयम्– *यस मन्त्रले आचमन गराउने–*

ॐ विनायक ! नमस्तुभ्यं त्रिदशैरभिवन्दित ! ।
गङ्गोदकेन देवेश ! कुरुष्वाचमनं प्रभो ! ॥
ॐ ततो व्विराडजायत व्विराजोऽधि पूरुषः ।
स जातो अत्यरिच्यत प्रश्चद् भूमिमथो पुरः ॥ (शु. य. ३१।५)
आचमनीयं समर्पयामि

स्नानम्– *यस मन्त्रले स्नान गराउने–*

ॐ मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ॥
ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे व्वायव्यानारण्या ग्राम्याश्च ये ॥ (शु. य. ३१।६)
स्नानार्थं जलं समर्पयामि ।

पञ्चामृतस्नानम्– यस मन्त्रले पञ्चामृतले स्नान गराउने

ॐ पञ्चामृतं मया नीतं पयो दधि घृतं मधु।
शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥
ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधासो देशे भवत्सरित् ॥

गोपयसा— यस मन्त्रले गाईको दूध चढाउने

ॐ कामधेनुसमुद्भूतं सर्वेषं जीवनं परम् ।
एज्ञहेतुः पावनं च पयः स्नानार्थमर्पितम्' ॥
ॐ पयःपृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ पयःस्नानं समर्पयामि ।

दधिस्नानम्—यस मन्त्रले दहिले स्नान गराउने

ॐ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देव ! स्नानार्थं प्रतिगृह्यताम् ॥
ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभिनो मुखाकरत्प्रण आयूꣳषि तारिषत् ॥ (शु. य. २३।३२)
दधिस्नानं समर्पयामि ।

गोधृतस्नानम्— यस मन्त्रले गाईको घिउले स्नान गराउने

ॐ नवनीतसमुद्भूतं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रयच्छामि स्नानार्थं प्रतिगृह्यताम् ॥
ॐ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतमस्य धाम ।
अनुष्वधमावह मादयस्व स्वाकाकृतं वृषभ वक्षि हव्यम् ॥
(शु. य. १७।८८)

अथवा—

ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि ।
प्रियो देवानामनाधृष्टं देवयजनमसि ॥
घृतस्नानं समर्पयामि ।

मधुस्नानम्– यस मन्त्रले मन्त्रले महले स्नान गराउने

ॐ पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥
मधुस्नानं समर्पयामि ।

शर्करास्नानम्– यस मन्त्रले शखरले स्नान गराउने

ॐ इक्षुसारसमुद्भूतां शर्करा पुष्टिदां शुभाम् ।
मलापहारिका दिव्यां स्नानार्थं प्रतिगृह्यताम् ॥
ॐ अपाँ रसमुद्वयसँ सूर्ये सन्तँ समाहितम् । अपाँ रसस्य यो रसस्तं वो गृह्णाम्युत्तमगृहीतोऽसीन्द्राय त्वाजुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ शर्करास्नानं समर्पयामि ।

शुद्धोदकस्नानम्– यस मन्त्रले शुद्धजलले स्नान गराउने

ॐ गङ्गा च यमुना चैव गोदावरी सरस्वती ।
नर्मदा सिन्धु कावेरी स्नानार्थं प्रतिगृह्यताम् ॥
ॐ आपो हिष्ठा मयो भुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा चन ॥ शुद्धोदकस्नानं समर्पयामि ।

स्नानाङ्गमाचमनीयम्– यस मन्त्रले विभिन्न अंगमा स्नान गराउने

ॐ सर्वतीर्थसमायुक्तं सुगन्धिनिर्मलं जलम् ।
आचम्यतां मया दत्तं गृहाण परमेश्वर ॥
ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥ स्नानाङ्गचमनीयं समर्पयामि ।

वस्त्रम्– यस मन्त्रले कपडा चढाउने:

ॐ शीतवातोष्णसन्त्राणं लज्जाया रक्षणं परम्।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ॥
ॐ युवा सुवासा परिवीत आगात्स उश्रेयान्भवति जायमानः। तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः
। वस्त्रं समर्पयामि।

ततः ॐ भूर्भुवः स्वः श्रीगणेशाय नमः वस्त्राङ्गमाचमनीयं समर्पयामि।

उपवस्त्रम्– यस मन्त्रले वस्त्र चढाउने:

ॐ सूक्ष्मतन्तुमयं दिव्यं वपुः शोभाकरं महत्।
उपवस्त्रं मया दत्तं गृहाण गणनायक ॥
ॐ सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः।
वासो अग्ने विश्वरूपह्य संव्ययस्व विभावसोः ॥ (शु. य. ११।४०)
उपवस्त्रं समर्पयामि।

उपवीतम्– यस मन्त्रले जनै चढाउने :

ॐ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
उपवीतं मया दत्तं गृहाण गणनायक ॥

यस मन्त्रले जनै चढाउने:-

ॐ तस्मादश्वा अजायन्त ये के चोभयादतः।
गवो ह यज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ (शु. य. ३१।८)
यज्ञोपवीतं सपर्मयामि।

चन्दनम्– यस मन्त्रले चन्दन चढाउने:

ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
ॐ त्वां गन्धर्वा अखर्नेस्त्वामिन्द्रस्त्वां वृहस्पतिः।

त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥ (शु. य. १२।९८)
चन्दनं समर्पयामि ।

कुङ्कुमम्– यस मन्त्रले सुगन्धित द्रव्य चढाउने:

ॐ कुङ्कुमं कामदं नित्यं कामिनीकामसम्भवम् ।
कुङ्कुमेनाचंनं देव गृहाण परमेश्वर ॥

नानापरिमलद्रव्याणि– यस मन्त्रले विभिन्न किसिमका द्रव्यहरु चढाउने

ॐ नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम् ।
अबीरनामकं दिव्यं गन्धं चारु प्रगृह्यताम् ॥
ॐ अहिरिब भोगैः पर्येति बाहुञ्ज्याया हेतिम्परिबाधमानः । हस्तध्नो विश्व व्वयुनानि विद्वान् पुमान्पुमाᳬसम्परिपातु विश्वतः ।
कुङ्कुमं नानापरिमलद्रव्याणि समर्पयामि ।

अक्षतान्– यस मन्त्रले अक्षता चढाउने:

ॐ अक्षताश्च सुरश्रेष्ठाः कुङ्कुमाक्ताः सुशोभनाः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ॥
ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ अक्षतान् समर्पयामि ।

पुष्पाणि– यस मन्त्रले फूलहरु चढाउने:

ॐ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाऽऽहृतानि पुष्पाणि पूजार्थ प्रतिगृह्यताम् ॥
सुगन्धिपुक्ष्पर्निचयैर्ग्रथितां पुष्पमालिकाम् ।
ददामि तव शोभार्थ गृहाण परमेश्वर ॥

ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
ऋश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ (शु. य. १२।७७)
पुष्पाणि (पुष्पमालां च) समर्पयामि ।

दूर्वाङ्कुरान्– यस मन्त्रले दूवो चढाउने

ॐ त्वं दूर्वेऽमृतजन्मानि वन्दितासि सुरैरपि ।
सौभाग्यं सन्तर्ति देहि सर्वकार्यकरी भव ॥
दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान् ।
आनीताँस्तव पूजार्थं गृहणा गणनायक ॥
ॐ काण्डात्काण्डात् प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥ (शु. य. १३।२०)
ॐ श्रीगणेशाय नमः दूर्वाङ्कुरान् समर्पयामि ।

धूपम्– यस मन्त्रले धूपबत्ति दर्शाउने

ॐ वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
ॐ धूरसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः । देवानामसि बह्नितमꣳ सस्नितमं जुष्टतमं देवहूतमम् ॥ ॐ श्रीगणेशाय नमः धूपमाघ्रापयामि ।

दीपम्– यस मन्त्रले दीप जलाउनेः

ॐ साज्यं च वह्निसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥
भक्त्या दीपं प्रयच्छामि देवाय परमात्मने ।
त्राहि मां निरयाद् घोराद्दीपज्योतिर्नमोऽस्तु ते ॥

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा । अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वचः स्वाहा । ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ (शु. य. ३।९)

ॐ श्रीगणेशाय नमः दीपं दर्शयामि ।

नैवेद्यम् – यस मन्त्रले नैवेद्य चढाउने:

ॐ नैवेद्यं गृह्यातां देव भक्ति मे ह्यचलां कुरु ।
ईप्सितं च वरं देहि परत्र च परां गतिम् ॥
शर्कराघृतसम्पववं सुस्वादु मधुरं हितम् ।
नानाफलसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥
ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्रप्रदातारं तारिष ऊर्ज्जं नो धेहि द्विपदे चतुष्पदे ॥
ॐ श्रीगणेशाय नमः नैवेद्यम् समर्पयामि ।

करोद्वर्तनमक्–

ॐ चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम् ।
करोद्वर्तनकं देव ग्रहाण गणनायक ॥
ॐ श्रीगणेशाय नमः कस्तूर्यादिमिश्रितेन चन्दनेन करोद्वर्तनकं गन्धानुलेपनं समर्पयामि ।

अखण्डफलम्– यस मन्त्रले नरिवेल चढाउने:

ॐ नारिकेरफलं जम्बू नारङ्ग दाडिमादिकम् ।
कूष्माण्डः पुरतो भक्त्या कल्पितं पतिगृह्यताम् ॥
इदं फलं मया देव स्थापितं पुरतस्तव ।
तस्मात्फलप्रदानेन सफलाः स्युर्मनोरथाः ॥
ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
वृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वह्य हसः ॥ (शु. य. १२।८९)

ॐ श्रीगणेशाय नमः अखण्डफलानि समर्पयामि।

ताम्बूलपूगीफलम्— यस मन्त्रले पान सुपारी चढाउने

ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥
ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत्।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥ (शु. य. ३१।१४)

ॐ श्रीगणेशाय नमः एलादिचूर्णयुक्तां ताम्बूलवीटिकां समर्पयामि (अलाभे ताम्बूलं च समर्पयामि)।

दक्षिणाद्रव्यम्— यस मन्त्रले दक्षिणा रुपैया पैसा चढाउने

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥
ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातःपतिरेकआसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥
(शु. य. २५।१०)

ॐ श्रीगणेशाय नमः कृतयाः पूजायाः साद्‌गुण्यार्थे दक्षिणाद्रव्यं समर्पयामि।

कर्तूरारार्तिक्यम्— यस मन्त्रले आरति गर्ने

ॐ कदलीभर्गसम्भूतं कर्पूरं तु सुदीपितम्।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव॥
ॐ आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः।
दिवः सदाꣳसि वृहती वितिष्ठस आ त्वेषं वर्तते तमः॥

ॐ श्रीगणेशाय नमः कर्पूरनीराजनं समर्पयामि।

प्रदक्षिणा - यस मन्त्रले प्रदक्षिणा गर्ने

ॐ यानि कानि च पापानि ज्ञाताज्ञातकृतानि च।

तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥
पदे पदे वा प्रतिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति ।
तं सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते पारितः करोमि ॥
ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ॥
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥
ॐ श्रीगणेशाय नमः प्रदक्षिणां समर्पयामि ।

यति पूजागरी सकि गणेशजीलाई दण्डवत् प्रणाम गर्नु त्यसपछि फूल अक्षता र चन्दन लिएर कलशको मुखमा पूजा गर्नु :

ॐ श्रीमन्महागणाधिपतये नमः । ॐ विनायकादि पञ्चलोकपालेभ्यो नमः । ॐ आदित्यादि नवग्रहेभ्यो नमः । ॐ ईश्वराद्यधिदेवेभ्यो नमः । ॐ अग्न्यादि प्रत्यधिदेवेभ्यो नमः । ॐ इन्द्रादिदशदिक्पालेभ्यो नमः । ॐ वीरभद्रादिएकादशरुद्रेभ्यो नमः । ॐ गौर्यादिषोडाशमातृभ्यो नमः । ॐ आवहादिसप्तमरुद्भ्यो नमः । ॐ विनायक ब्रह्मविष्णु रुद्रार्कवनस्पतिभ्यो नमः । ॐ इष्टदेवाताभ्यो नमः । ॐ कुलदेवताभ्यो नमः । ॐ ग्रामदेवाभ्यो नमः । ॐ स्थानदेवताभ्यो नमः । ॐ सर्वेभ्यो देवेभ्यो नमः । ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः । ॐ मातृपितृचरणकमलेभ्यो नमः । ॐ एतत्कर्म प्रधानदेवताभ्यो नमः । ॐ नारायणाय नमः । ॐ पुण्यम पुण्याहम दीर्घमायुरस्तु ॥ अविघ्नमस्तु । भनी नमस्कार गर्ने ।

पुष्पाञ्जलिः— यस मन्त्रले हातमा फूल अक्षता लिने:

ॐ नानासुगन्धपुष्पाणि यथाकलोद्भवानि च ।
पुष्पाञ्जलिर्मया दत्तो गृहाण गणनायक ॥
ॐ अम्बे अम्बिके अम्बालिके न मा नयति कश्चन ।
समस्त्यस्वकः सुभद्रिकां काम्पीलवासिनीम् ॥
ॐ श्रीगणेशाय नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ।

विशेषार्घ गर्नेः—

अब हातमा तामाको पात्र लिएर जल रक्तचन्दन अक्षता नरिवेल, फूल, कुश, दुवो पैसा लिएर पानी समात्ने र तलको मन्त्र पढ्ने—

ॐ रक्षरक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक।
भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥
द्वैमातुर कृपासिन्धो षाण्मातुराजय प्रभो।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद॥
अनेन सफलार्घेण सफलोऽस्तु सदा मम।
ॐ श्रीगणेशाय नमः विशेषार्घ समर्पयामि।

प्रार्थना— हातमा अक्षता फूल लिएर अञ्जली बाधी प्रार्थना गर्ने :

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय
लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रृतियज्ञविभूषिताय
गौरीसुताय गणनाथ नमो नमस्ते॥ १॥
भक्तार्तिनाशनपराय गणेश्वराय
सर्वेश्वराय शुभदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय
भक्तप्रसन्नवरदाय नमो नमस्ते॥ २॥
नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः।
नमस्ते रुद्ररूपाय करिरूपाय ते नमः॥ ३॥
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे।
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक॥४॥
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ ५॥

॥ इति गणेश पूजनम्॥

अब ऋषिहरूको पूजाविधि प्रारम्भ हुन्छ :

अरुन्धतिसहित कश्यपादिसप्तर्षिपूजनम् ॥

अब टपरीमा चामल हालेर त्यसमा राखिएका कुशका अरुन्धतीसहितका सप्तऋषिको पूजामा पहिले प्राणप्रतिष्ठा गर्ने :

त्यसको लागि कर्मपात्रबाट कुश र फूल लिएर पानी समात्ने :

प्राणप्रतिष्ठा गर्नेः

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञॅं समिमं दधातु । विश्वेदेवा स इह मादयन्तमोंऽप्रतिष्ठ ॥
ॐ अस्यै प्राणः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति न कश्चन ॥

सप्तऋषिहरुका नामः

कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च साध्वी चैवाप्यरुन्ती ॥

सप्तऋषिहरुको आवाहन गर्ने : हरेक ऋषिको भिन्दाभिन्दै नामले गर्नु -

१. ॐ भूर्भुवः स्वः कश्यपाय नमः, कश्यपम् आवाहयामि । भो कश्यप ! इहागच्छ, इह तिष्ठ यावत्पूजां करोमि तावत्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव ।

२. ॐ भूर्भुवः स्वः भरद्वाजाय नमः, भरद्वाजम् आवाहयामि । भो भरद्वाज ! इहागच्छ, इह तिष्ठ यावत्पूजां करोमि तावत्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव ।

३. ॐ भूर्भुवः स्वः गौतमायः, गौतमम् आवाहयामि । भो गौतम! इहागच्छ, इह तिष्ठ यावत्पूजां करोमि तावत्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव ।

४. ॐ भूर्भुवः स्वः अत्रियायः, अत्रियम् आवाहयामि । भो अत्रे ! इहागच्छ, इह तिष्ठ यावत्पूजां करोमि तावत्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव।

५. ॐ भूर्भुवः स्वः जमदग्नये नमः, जमदग्नि आवाहयामि । भो जमदग्ने ! इहागच्छ, इह तिष्ठ यावत्पूजां करोमि तावत्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव।

६. ॐ भूर्भुवः स्वः वशिष्ठाय नमः, वसिष्ठम् आवाहयामि । भो वसिष्ठ ! इहागच्छ, इह तिष्ठ यावत्पूजां करोमि तावत्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव।

७. ॐ भूर्भुवः स्वः विश्वामित्राय नमः, विश्वामित्रम् आवाहयामि । भो विश्वामित्र ! इहागच्छ, इह तिष्ठ यावत्पूजां करोमि तावत्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव।

८. ॐ भूर्भुवः स्वः अरुन्धत्यै नमः, अरुन्धतीम् आवाहयामि । भो अरुन्धति ! इहागच्छ, इह तिष्ठ यावत्पूजां करोमि तावत्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव।

ध्यानम् :

ॐ मूर्तिर्ब्रह्मण्यदेवस्य ब्रह्मणस्तेज उत्तमम् ॥
भानुकोटिप्रतीकाशमृषिवृन्दं विचिन्तये ॥

तलको मन्त्रले सप्तऋषिको प्राथर्ना गर्नुः

ॐ सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम्। सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ॥ ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाॅंसुरे स्वाहा॥ ॐ सहस्रशीर्षा पुरुषः

सहस्राक्षः सहस्रपात्। स भूमिᳬ सर्वत स्पृत्वात्यतिष्ठ द्दशाङ्गुलम्॥ ॐ मूर्ति ब्रह्मण्य देवस्य ब्रह्मण्यं तेज उत्तमम्। सूर्यकोटि प्रतीकाशम् ऋषिवृन्दं विचिन्तयेत॥ इति प्रार्थना।

आसन दिने :

ॐ ऋग्यजुः सामवेदानां स्वरुपेभ्यो नमो नमः। पुराणपुरुषेभ्यो हि देवर्षिभ्यो नमो नमः॥ ॐ कुशासने पवित्रेऽस्मिँस्तिष्ठन्तु मुनिसत्तमाः। अरुन्धत्या समातास्ते जयमुकुटधारिणः॥ अरुन्धतीसहित सप्तऋषिलाई एकएक कुशका टुक्रा आसन स्वरुप दिने।

पाउ पूजागर्ने :

ॐ गन्धपुष्पाक्षतैर्युक्तं पाद्यं गृह्णन्तु भो द्विजाः।
प्रसादं कुरुन्त प्रीताः प्रणतसय सदा ममः॥
ॐ गंगाजलं समानीतं गन्धद्रव्येण संयुक्तम्।
पाद्यार्थं प्रतिगृह्यन्तु कश्यपाद्यास्तपोधनाः॥

ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः पाद्यं समर्पयामी।

अर्घ चढाउने मन्त्रः

ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत् पुनः।
ततो विष्वं व्यक्रामत् साशनानशने अभि॥ (शु. य. ३१।४)
ॐ नभस्ये शुक्लपञ्चम्यामर्चिता ऋषिसत्तमाः।
पापं दहन्तु मे सर्वं गृह्णन्त्वर्घ्यं नमो नमः॥

ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः अर्घ्यम् समर्पयामी॥

आचमनम्– यस मन्त्रले आचमन गराउने–

ॐ लोकानां तुष्टिकर्तारो यूयं सर्वे तपोधनाः ।
नमो वो धर्मविज्ञेभ्यो गृह्णीताचमनं त्विदम् ।
ॐ ततो व्विराडजायत व्विराजोऽधि पूरुषः ।
स जातो अत्यरिच्यत प्रश्चद् भूमिमथो पुरः ॥ (शु. य. ३१।५)

ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः आचमनीयं समर्पयामि

स्नानम्– यस मन्त्रले स्नान गराउने-

ॐ मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं देव स्नानार्थ प्रतिगृह्यताम् ॥
ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे व्वायव्यानारण्या ग्राम्याश्च ये ॥ (शु. य. ३१।६)

ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः स्नानार्थं जलं समर्पयामि ।

पञ्चामृतस्नानम्– यस मन्त्रले पञ्चामृतचढाउने

ॐ पयोदधिघृतं चैव शर्करामधुसंयुतम् ।
पञ्चामृतेन स्नपनं करिष्ये ऋषिसत्तमाः ॥
ॐ पञ्चामृतं मया नीतं पयो दधि घृतं मधु ।
शर्करा च समायुक्तं स्नानार्थ प्रतिगृह्यताम् ॥

ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः पञ्चामृतस्नानं समर्पयामि ।

स्नानम्– यस मन्त्रले शुद्धजलले स्नान गराउने

ॐ मन्दाकिन्याः समानीतं यमुनागौतमीजलम् ।
कृष्णा च नर्मदा तापी ताभ्यः स्नानार्थमर्पितम् ।
ॐ गङ्गा च यमुना चैव गोदावरी सरस्वती ।

नर्मदा सिन्धु कावेरी स्नानार्थ प्रतिगृह्यताम् ॥

ॐ भूर्भुवः स्वः अरुन्धतीसहित कश्यपादिसप्तऋषिभ्यो नमःशुद्धोदकस्नानं समर्पयामि ।

